श्रीरामजन्मभूमिः अयोध्या नगरे अस्ति। तत्र बाबरमहोदयेन प्राचीनं मन्दिरं भूमिसात्कृत्वा यावनधर्ममन्दिरं निर्मापितम्। लक्षावधिसंख्यकाः हिन्दवः निजतीर्थस्थानं प्राप्तुं स्वजीवनानि अर्पितवन्तः। न्यायालयस्य आदेशेन तत्स्थानं सद्य एव मुक्तम् अभवत्। यवनानां धार्मिकासहिष्णुतायाः एतत् अविस्मरणीयं निदर्शनम् अस्ति।

प्रश्नाः— 1. श्रीरामजन्मभूमिः कुत्र अस्ति ?
2. तत्र यावनधर्ममन्दिरं केन निर्मापितम् ?
3. हिन्दवः किमर्थ स्वजीवनानि अर्पितवन्तः ?
4. अधुना रामजन्मभूमिः कथं मुक्तिम् अलभत ?
5. यवनानां धार्मिकासहिष्णुतायाः निदर्शनम् किमस्ति ?

उत्तराणि— 1. श्रीरामजन्मभूमिः अयोध्यानगरे अस्ति।
2. तत्र यावनधर्ममन्दिरं बाबरमहोदयेन निर्मापितम्।
3. हिन्दवः रामजन्मभूमि प्राप्तुं स्वजीवनानि अर्पितवन्तः।
4. अधुना रामजन्मभूमिः न्यायालयस्य आदेशेन मोक्षम् अलभत्।
5. रामजन्मभूमिः यवनानां धार्मिकासहिष्णुतायाः निदर्शनमस्ति।

VI

भारतीयसंस्कृत्याः प्रमुख विशेषता आध्यात्मिकता अस्ति। धर्मार्थकाममोक्षेषु मोक्षप्राप्तिः मानवजीवनस्य चरमं लक्ष्यम् अस्ति। भारतीय संस्कृतिः आध्यात्मिक-चिन्तनमूलाः अस्ति। वेदेषु एव सर्वप्रथमम् आध्यात्मिकविचारधारा प्रवहमाना दृश्यते। वेदानां माहात्म्यं हिन्दूधर्मे नितान्तम् उच्चतम विशालं चास्ति।

प्रश्नाः— 1. भारतीय संस्कृत्याः प्रमुखविशेषता कास्ति ?
2. मानवजीवनस्य चरम् लक्ष्यं किमं अस्ति ?
3. आध्यात्मिकचिन्तनमूला का वर्तते ?
4. सर्वप्रथमम् आध्यात्मिकविचारधारा कुत्र प्रवहमाना दृश्यते ?
5. हिन्दूधर्मे नितान्तं उच्चतम् माहात्म्यं केषाम् अस्ति ?

उत्तराणि— 1. भारतीयसंस्कृतेः प्रमुखविशेषता आध्यात्मिकता अस्ति।
2. मानवजीवनस्य चरम् लक्ष्यं मोक्षप्राप्तिः अस्ति।
3. आध्यात्मिकचिन्तनमूला भारतीया संस्कृतिः अस्ति।

4. सर्वप्रथमम् आध्यात्मिक-विचारधारा वेदेषु प्रवहमाना अस्ति।
5. हिन्दूधर्मे नितान्तमं उच्चतम् माहात्म्यं वेदानाम् अस्ति।

VII

मथुराप्रदेशे होलिकायाः विशेषायोजनं भवति। तत्र रंगमंचम् उपस्थाप्य जनाः सप्ताहपर्यन्तं भाण-प्रहसनानि रूपकानि अभिनयन्ति। नानावर्णगुलालं मुखोपरि प्रक्षिपन्ति। परस्परं वस्त्रेषु रंग-क्षेपणं कुर्वन्ति। जनाः स्वमित्राणां बन्धूनां च गृहं यान्ति। तत्र मिष्टान्नादिकस्य सेवनं, आदान-प्रदानं च भवति। आपणेषु, रथ्यासु, च नानारङ्ग-विभूषिताननाः जनाः परस्परम् आलिङ्गन्ति। मदोन्मत्ताः जनाः अत्र तत्र सर्वत्र कूर्दन्ति च उच्छलन्ति च।

प्रश्नाः— 1. होलिकायाः विशेषायोजनं कुत्र भवति?
2. तत्र जनाः किं अभिनयन्ति?
3. मुखोपरि किं प्रक्षिपन्ति?
4. जनाः केषां गृहं सान्ति?
5. कीदृशाः जनाः परस्परम् आलिङ्गन्ति?

उत्तराणि— 1. होलिकायाः विशेषायोजनं मथुराप्रदेशे भवति।
2. तत्र जनाः भाणप्रहसनानि अभिनयन्ति।
3. मुखोपरि नानावर्णगुलालं प्रक्षिपन्ति।
4. जनाः स्वामित्राणां बन्धूनां च गृहं यान्ति।
5. नाना-रङ्ग-विभूषिताननाः जनाः परस्परम् आलिङ्गन्ति।

VIII

स्वाध्यायात् न प्रमदितव्यम्। स्वाध्यायी जनाः आत्मशुद्धेः मार्गम् अनुसरति। ज्ञानार्जनस्य वहवः उपायाः सन्ति। तेषु उपायेषु पुस्तकालयस्य उपयोगः अपि अन्यतमः सुलभः उपायः अस्ति। तत्र गत्वा जनाः स्वस्वरुच्यनुगतानि पुस्तकानि प्राप्नुवन्ति। एतानि पुस्तकानि पठित्वा जनाः। अतिशयज्ञानवृद्धिं कुर्वन्ति।

प्रश्नाः— 1. कस्मात् न प्रमदितव्यम्?
2. आत्मशुद्धेः मार्गम् कः अनुसरति?
3. जनाः पुस्तकालयेषु किं प्राप्नुवन्ति?
4. पुस्तकानि पठित्वा जनाः कस्य वृद्धिम् कुर्वन्ति।
5. ज्ञानवृद्धेः अन्यतमः सुलभः उपायः कः अस्ति?

उत्तराणि— 1. स्वाध्यायात् न प्रमदितव्यम्।
2. आत्मशुद्धेः मार्ग स्वाध्यायी अनुसरति।
3. जनाः पुस्तकालयेषु स्वरुचिम् अनुसृत्य पुस्तकानि लभन्ते।
4. पुस्तकानि पठित्वा जनाः ज्ञानस्य वृद्धिं कुर्वन्ति।
5. ज्ञानवृद्धेः अन्यतमः सुलभः उपायः 'पुस्तकालयस्य सदुपयोगः' अस्ति।

IX

परा दिल्लीनगरे विद्याभारती एकं शिशुशिविरम् आयोजितवती। तदायोजनं अतीव प्रभावकारकम् आसीत्। तद् दृष्ट्वा दर्शकानां हृदयेषु भारतस्य स्वर्णिमं भविष्यं प्रति दृढा आस्था उद्भूता। तत्र साङ्घिक-कार्यक्रमाणाम् अद्भुत-छटाम् अवलोक्य जनाः चकिताः जाताः। बालकानां विकासे ईदृशानां कार्यक्रमाणां महत्त्वपूर्णं स्थानं वर्तते।

प्रश्नाः— 1. विद्याभारती किम् आयोजितवती?
2. शिशुशिविरं कुत्र आयोजितम्?
3. शिविरं दृष्ट्वा जनाः किम् अन्वभवन्?
4. किम् आलोक्य जनाः चकिताः जाताः?
5. बालाविकासे केषां स्थानं महत्त्वपूर्णम् अस्ति?

उत्तराणि— 1. विद्याभारती शिशुशिविरम् आयोजितवती।
2. शिशुशिविरं दिल्लीनगरे आयोजितम्।
3. शिविरं दृष्ट्वा जनाः भारतस्य स्वर्णिमं भविष्यं प्रति आस्थावन्तः जाताः।
4. साङ्घिक-कार्यक्रमाणाम् अद्भुतां छटाम् आलोक्य जनाः चकिता जाताः।
5. बालविकासे शिविराणां स्थानं महत्त्वपूर्णं वर्तते।

X

'सहशिक्षा' इत्यय शब्दः बालक-बालिकयोः सहैव एकस्मिन् विद्यालये शिक्षां बोधयति। सहशिक्षायाः समर्थकाः मन्यते यत् तया सर्वकारस्य बहुधनं रक्षितुं शक्यते। बाल्यावस्थायाः एव सहवासेन बालकाः बालिकाः व्यवहारकुशलाः भवन्ति। प्राचीनकाले अपि आश्रमेषु तापसयुवानो युवत्यश्च सहैव तिष्ठन्तः शिक्षां गृह्णन्ति स्म। सहशिक्षाविरोधिनः कथयन्ति यत् तया शिक्षाग्रहणे तेषां प्रवृतिः मन्दा जायते। अन्यान्यविषयेषु तेषाम् अधिका रुचिः प्रवतिश्च भवति।

प्रश्नाः— 1. 'सहशिक्षा' इति शब्दः किं बोधयति?
2. सर्वकारस्य बहुधनं कथं रक्षितुं शक्यते?
3. परस्पर सहवासेन जनाः कीदृशाः भवन्ति?
4. आश्रमेषु के सह अतिष्ठन्?
5. केषां मतेषु सहशिक्षया जनः मन्दरुचिः जायते?

उत्तराणि— 1. 'सहशिक्षा' इति शब्दः बालक-बालिकयोः विद्यालयेषु सहशिक्षणं बोधयति।
2. सर्वकारस्य बहुधनं सहशिक्षया रक्षितुं शक्यते।
3. परस्परसहवासेन जनाः व्यवहारकुशलाः जायन्ते।
4. आश्रमेषु तापसयुवानो युवत्यश्च सहैव अतिष्ठन्।
5. सहशिक्षाविरोधिनां मतेषु सहशिक्षया जनः मन्दरुचिः भवति।

XI

अस्ति कस्मिंश्चिद् वने नानाजलचरसनाथं महत् सरः। तत्र च कृताश्रयो बकः एको वृद्धभावम् उपागतो मत्स्यान् व्यापादयितुम् असमर्थः। ततश्च क्षुत्क्षामकण्ठः सरस्तीरे उपविष्टो रुरोद। एकः कुलीरको नानाजलचरसमेतः तत्र समागतः।

प्रश्नाः— 1. वने किम् आसीत्?
2. वृद्धभावम् कः उपागतः?
3. मत्स्यान् व्यापादयितुं कः असमर्थः?
4. बकः कुत्र उपविष्टः रुरोद?
5. नानाजलचरसमेतः कः समागतः?

उत्तराणि— 1. वने नानाजलचरसनाथं महत् सरः आसीत्।
2. वृद्धभावम् वकः उपागतः।
3. मत्स्यान् व्यापादयितुं वृद्धः वकः असमर्थः आसीत्।
4. बकः सरस्तीरे उपविष्टः रुरोद।
5. नानाजलचरसमेतः एकः कुलीरकः समागतः।

XII

बाबर-आक्रमण-समये शासकेन गुरु-नानकः कारागारे निक्षिप्तः। तत्र तेनासौ पेषणीचालने नियुक्तः। परन्तु विस्मिताः द्वारपालकाः लोकोत्तरम् चमत्कारम् अपश्यन् यत् पेषणी स्वचालितयन्त्रम् इव क्रियाशीला अस्ति। गुरुनानकश्च अन्यत्र एकस्मिन् कोणे समाधिस्थोऽतिष्ठत्।

प्रश्नाः— 1. कारगारे कः निक्षिप्तः?
2. शासकेन गुरुनानकः कस्मिन् नियुक्तः?
3. द्वारपालकाः किम् अपश्यन्?
4. पेषणी कथं क्रियाशीला आसीत्?
5. गुरुनानकः तदा कुत्र अतिष्ठत्?

उत्तराणि— 1. कारागारे गुरुनानकः निक्षिप्तः।
2. शासकेन गुरुनानकः पेषणी चालने नियुक्तः।
3. द्वारपालकाः लोकात्तरं चमत्कारम् अपश्यन्।
4. पेषणी स्वचालितयन्त्रम् इव स्वतः क्रियाशीला आसीत्।
5. गुरुनानकः तदा एकस्मिन् कोणे समाधिस्थः आसीत्।

XIII

अस्ति ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती। तमवलोक्य सर्वे शृगालाः चिन्तयन्ति स्मयद्ययं केनाप्युपायेन म्रियते तदास्माकम् एतद्-देहेन मासचतुष्टयस्य भोजनं भविष्यति। तत्रैकेन वृद्ध शृगालेन प्रतिज्ञातम्—मया बुद्धिप्रभावत् अस्य मरणं साधयितव्यम्। अनन्तरं स वञ्चकः कर्पूरतिलकसमीपं गत्वा साष्टाङ्गपातं प्रणम्योवाच—देव, दृष्टिप्रसादं कुरु।

प्रश्नाः— 1. ब्रह्मारण्ये कः आसीत्?

2. श्रृगालाः कम् अवालोकयन् ?
3. वृद्धश्रृगालेन किं प्रतिज्ञातम् ?
4. वञ्चकः कः आसीत् ?
5. हस्तिदेहेन कियद् भोजनम् अपेक्षितम् ?

उत्तराणि— 1. ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती आसीत्।
2. श्रृगालाः कर्पूरतिलकं नाम हस्तिनम् अवालोकयन्।
3. वृद्धश्रृगालेन प्रतिज्ञातं यत् तेन बुद्धिप्रभावात् हस्तिमरणं साधनीयम्।
4. वञ्चकः वृद्धश्रृगालः आसीत्।
5. हस्तिदेहेने मासचतुष्टयस्य भोजनम् अपेक्षितम्।

XIV

अस्ति मगधदेशशेखरीभूता पुष्पपुरीनाम नगरी तत्र राजहंसो नाम भूपो बभूव। तस्य धर्मपाल पद्मोद्भवीसतवर्मनामधेयाः त्रयाः कुलामात्याः अभूवन्। तेषां सितवर्मणः सुमति-सत्यवर्माणौ धर्मपालस्य सुमन्त्र सुमित्रकामपालाः, पद्मोद्भवस्य सुश्रुतरत्नोद्भवाविति तनयाः समभूवन्। तेषु धर्मशीलः सत्यवर्मा संसारासारतां बुद्ध्वा तीर्थयात्राभिलाषी देशान्तरम् अगच्छत्।

प्रश्नाः— 1. राजहंसः कः आसीत् ?
2. राजहंसस्य अमात्यानां नामानि लिखत।
3. सितवर्मणः पुत्रनाम्नी लिखत।
4. देशान्तरम् कः अगच्छत् ?
5. सत्यवर्मा तीर्थाभिलाषी कथं जातः ?

उत्तराणि— 1. राजहंसः नाम पुष्पपुर्याः भूप आसीत्।
2. राजहंसस्य अमात्यानां नामानि धर्मपालः, पद्मोद्भव सितवर्मा च आसन्।
3. सितवर्मणः पुत्रनाम्नी सुमति-सत्यवर्माणौ आस्ताम्।
4. देशान्तरं धर्मशीलः सत्यवर्मा अगच्छत्।
5. सत्यवर्मा संसारासारतां बुद्ध्वा तीर्थाभिलाषी जातः।

XV

राजा भोजः सर्वं राज्यं कवये दत्त्वा स्वयं लीलादेव्या सह वन गन्तुं तत्परः आसीत्। तस्य अमात्यः बुद्धिसागरः कवेः श्लोक पाठं श्रुत्वा राज्ञा दत्रं राज्यं कोटिद्रव्यमूल्येन प्राप्तवान् राजानं च कथितवान्—'भवदीयमेव राज्यं भुङ्क्ष्व' इति। तदा राजा अमात्यं विशेषेण सम्मानितवान्।

प्रश्नाः— 1. राजा भोजः कस्मै राज्यं दत्तवान् ?
2. बुद्धिसागरः कः आसीत् ?
3. बुद्धिसागरः राज्यं कथं प्राप्तवान् ?
4. बुद्धिसागरः राजानं किं कथितवान् ?
5. राज्यं प्राप्य भोजराजः कं विशेषेण सम्मानितवान् ?

उत्तराणि— 1. राजा भोजः कवये राज्यं दत्तवान्।
2. बुद्धिसागरः भोजराजस्य अमात्यः आसीत्।
3. बुद्धिसागरः कोटिद्रव्यमूल्येन राज्यं प्राप्तवान्।
4. बुद्धिसागरः राजानं कथितवान्—'भवदीयमेव राज्यं भुङ्क्ष्व' इति।
5. राज्यं प्राप्य भोजराजः बुद्धिसागरं विशेषेण सम्मानितवान्।

XVI

असह्यानि कष्टानि सोढ्वा महापुरुषाः भारतं स्वतन्त्रं अकुर्वन्। अल्पकालेन एव देशस्य स्वतन्त्रतायाः रक्षायाः भारः बालकेषु भविष्यति। तेन बालकैः प्राणपणेन भारमातुः सेवार्थं प्रतिज्ञा करणीया। सत्रवः तु भारतदेशं रसातलं नेतुं प्रयतन्ते। देशस्य स्वतन्त्रतां चिरस्थायिनीं विधातुं बलिदानस्य महती अपेक्षा भवति।

प्रश्नाः— 1. महापुरुषाः कथं भारतं स्वतन्त्रं अकुर्वन्?
2. बालकेषु कदा भारत स्वतन्त्रतायाः रक्षाभारः भविष्यति?
3. बालकैः कीदृशी प्रतिज्ञा करणीया?
4. शत्रवः किमर्थं प्रयतन्ते?
5. किमर्थम् बलिदानस्य अपेक्षा भवति?

उत्तराणि— 1. महापुरुषाः भारतं असह्यानि कष्टानि सोढ्वा स्वतन्त्रम् अकुर्वन्।
2. बालकेषु अल्पकालेनैव भारतस्य स्वतन्त्रतायाः रक्षाभारः भविष्यति।
3. बालकैः भारतमातुं प्राणपणेन रक्षार्थं प्रतिज्ञा विधेया।
4. शत्रवः भारतं रसातलं नेतुं प्रयतन्ते।
5. देशस्य स्वतन्त्रतां चिरस्थायिनीं विधातुं बलिदानस्य अपेक्षा भवति।

XVII

सेनासहितं भरतं वीक्ष्य लक्ष्मणः रामाय स्वशङ्कां निवेदितवान्। तत् श्रुत्वा रामः विहसन् प्राह—'नाहं भरतं तथा मन्ये यथा त्वं स्वचेतसि कल्पयसि। सः प्रजाजनैः सह दर्शनेच्छयां एव समायातीति मे मतिः। एवं वदतः एव भरतः रामस्य पादौ जग्राह, न च शशाक वक्तुम्। ततः रामः वारंवारं कृताग्रहोऽपि पितुः आज्ञा-भङ्गभयेन न मेने प्रत्यावर्तनाय।

प्रश्नाः— 1. लक्ष्मणः सेनासहितं कम् अपश्यत्?
2. लक्ष्मणः रामाय किं निवेदितवान्?
3. भरतः किमर्थं समायातः?
4. रामः प्रत्यावर्तनाय किमर्थं न मेने?
5. भरतः किं कर्त्तु न शशाक?

उत्तराणि— 1. लक्ष्मणः सेनासहितं भरतम् अपश्यत्।
2. लक्ष्मणः रामाय भरतविषये स्वशङ्कां निवेदितवान्।
3. भरतः रामं अयोध्यायां प्रत्यावर्तयितुं समायातः।
4. रामः पितुः आज्ञा-भङ्गात् भीतः प्रत्यावर्तनं न स्वीकृतवान्।
5. भरतः वक्तुं न शशाक।

XVIII

दुर्जनानां संसर्गेण बहवो हानयः भवन्ति। तेन मानवः असद्वृत्तो भवति। तस्य शरीरं क्षीणं निर्बलं च भवति। तस्य कीर्तिः नश्यति। तस्य सर्वत्र अनादरो भवति।अतः दर्जनैः सह संगतिः कदापि न करणीया। स्वयशोवृद्धये सुखशान्तिलाभाय च सर्वदा सज्जनां संगतिः एव करणीया।

प्रश्नाः— 1. दुर्जनसंसर्गेण किं भवति?
2. कस्य शरीरं क्षीणं दुर्बलं च भवति?
3. कस्य कीर्तिः नश्यति?
4. कैः सह संगतिः करणीया?
5. कैः सह संगो न विधेयः?

उत्तराणि— 1. दुर्जनसंसर्गेण बहवो हानयो भवन्ति।
2. दुर्जनैः संगतस्य मानवस्य शरीरं क्षीणं दुर्बलं च भवति।
3. दुर्जनैः संगतस्य जनस्य कीर्तिः नश्यति।
4. सज्जनैः सह संगतिः करणीया।
5. दुर्जनैः सह संगो न विधेयः।

XIX

विदेशगमनकाले महात्मा गान्धी प्रतिज्ञात्रयम् अकरोत् यथा 'नाहं मदिरां सेविष्ये, नाहं मांसस्पर्शं विधास्यामि, पूर्णरूपेण च ब्रह्मचर्यव्रतम् आचरिष्यामि। विदेशे सः त्रीणि वर्षाणि विधिशास्त्रम् अधीतवान्। स्वदेशम् आगत्य सः बैरिस्टरवृत्तिं प्रारभत तथा च अहिंसामूलस्य सत्याग्रहस्य प्रयोगेन स्वदेशोद्धाराय प्रायतत। दक्षिण-अफ्रीकादेशे भारतीयानां दुर्दशाम् विलोक्य स तेषाम् उद्धाराय अपि यत्नम् अकरोत् सफलतां च प्राप्तवान्।

प्रश्नाः— 1. महात्मा गान्धी प्रतिज्ञात्रयं कदा अकरोत्?
2. सः कियन्तं कालं विधिशास्त्रम् अधीतवान्?
3. स्वदेशम् आगत्य स किं प्रारभत।
4. अफ्रीकादेशे स किम् अपश्यत्?
5. सः कीदृशस्य सत्याग्रहस्य प्रयोगम् अकरोत्?

उत्तराणि— 1. महात्मा गान्धी विदेशगमनकाले प्रतिज्ञात्रयम् अकरोत्।
2. स त्रीणि वर्षाणि विधिशास्त्रम् अधीतवान्।
3. स्वदेशम् आगत्य स वैरिस्टरवृत्तिं प्रारभत।
4. अफ्रीकादेशे स भारतीयानां दुर्दशां अपश्यत्।
5. स अहिंसामूलस्य सत्याग्रहस्य प्रयोगम् अकरोत्।

XX

अस्ति कस्मिश्चिद् ग्रामे हरिदत्तो नाम ब्राह्मणः। तस्य च कृषिं कुर्वतः सदा एव निष्फलः कालो जायते। अथ एकस्मिन् दिवसे स स्वक्षेत्रमध्ये बल्मीकोपरि भीषणं भुजंगमं दृष्टवा चिन्तयामास—नूनम् एषा क्षेत्रदेवता मया न कदाचित् पूजिता। तेन मे

कृषि-कर्म विफलं भवति। तदस्य अद्याहं पूजां करिष्यामि। ततः कुतोऽपि क्षीरमानीय शरावे निक्षिप्य तदन्तिकमुपागत्य उवाच—भो क्षेत्रपाल ! मया तव उपस्थितिरत्र न ज्ञाता अतः पूजा न कृता, तत् क्षमस्व इत्येवमुक्त्वा दुग्धेन तं पूजयित्वा गृहमागच्छत्।

प्रश्नाः— 1. हरिदत्तः स्वक्षेत्रमध्ये किम् अपश्यत् ?
2. सर्पं दृष्ट्वा हरिदत्तः किम् अचिन्तयत् ?
3. सर्पस्य पूजार्थं हरिदत्तः किम् आनयत् ?
4. हरिदत्तः कथं सर्पं पूजितवान् ?
5. हरिदत्तः सर्पं किम् अमन्यत ?

उत्तराणि— 1. हरिदत्तः स्वक्षेत्रमध्ये भीषणं भुजङ्गमम् अपश्यत्।
2. सर्पं दृष्ट्वा हरिदत्तः अचिन्तयत् सर्पदेवतायाः पूजां न कुर्वतो। मम कृषिः विफला जाता, अतोऽहं अद्य अस्याः देवतायाः पूजां करिष्यामि।
3. सर्पस्य पूजार्थं स दुग्धम् आनीतवान्।
4. हरिदत्तः दुग्धेन सर्पं पूजितवान्।
5. हरिदत्तः सर्पं 'कृषिदेवता' इति अमन्यत।

XXI

भारतस्य उत्तरस्यां दिशि महोन्नतः पर्वतराजः हिमालयः वर्तते। यः उत्तरदिशातः प्रहरी इव भारत रक्षति। हिमालयः भारतदेशस्य समृद्धः भूभागः अस्ति, यतः अस्मात् पर्वतात् बह्व्यः नद्यः निस्सरन्ति, देशस्य विशालं भूभागं सिञ्चन्ति च।

प्रश्नाः— 1. अस्य उद्धरणस्य समुचितं शीर्षकं लिखत।
2. भारतस्य उत्तरस्यां दिशि कः वर्तते ?
3. प्रहरीव भारत कः रक्षति ?
4. भारतदेशस्य समृद्धः भूभागः कः अस्ति ?

उत्तराणि— 1. हिमालयः (शीर्षकः)।
2. हिमालयः भारतस्य उत्तरस्यां दिशि वर्तते।
3. हिमालयः भारतं प्रहरीव रक्षति।
4. हिमालयः भारतदेशस्य समृद्धः भूभागः अस्ति।

XXII

एकदा गोविन्दः आपणे कान्दविकात् मोदकान् क्रेतुमगच्छत्। सः कान्दविकः महावञ्चक आसीत्। सः सदा न्यूनमेवातोलयत्। तदानीमपि सः गोविन्दाय यथोचित मानादल्प-मेवायच्छत् तदा गोबिन्दः अवदत्। किं भोः ! मह्यं पूर्णं परिमाणं न प्रयच्छसीति। तत् श्रुत्वा कान्दविकः प्रत्यवदत्—का हानिः। यावदल्पं ते ददामि तावत्ते भारः सुबहो भविष्यति। गोबिन्दोऽपि तस्य शाठ्यं प्रतिकर्तुमेकेन रूप्यकेन हीनं मूल्यमददात्। ततः स सरोषमाह—किं मेऽल्पमेव मूल्यं ददासि। आम् यथा ते गणनायां नायासो भवेदिति उक्त्वा गोविन्दः गृहम्प्रत्यागच्छत्।

प्रश्नाः— 1. गोविन्दः आपणे किमर्थंगच्छत् ?
2. सः कान्दविकः कीदृशः आसीत् ?

3. यदा स न्यूनमतोलयत् तदा गोविन्दः किमवदत् ?
4. गोविन्दः तस्य शाठ्यं प्रतिकर्तुं किमकरोत् ?
5. अस्य गद्यांशस्य उचितं शीर्षकं लिखत।

उत्तराणि— 1. गोविन्दः आपणे कान्दविकात् मोदकान् क्रेतुम् अगच्छत्।
2. सः कान्दविकः महावञ्चकः आसीत्।
3. यदा सः न्यूनमतोलयत् तदा गोविन्दः अवदत् किं भोः मह्यं पूर्णं परिमाणं न प्रयच्छसीति।
4. गोविन्दः तस्य शाठ्यं प्रतिकर्तुम् एकेन रूप्यकेन हीनं मूल्यम् अददात्।
5. अस्य गद्यांशस्य उचितः शीर्षकः अस्ति—'शठे शाठ्यं समाचरेत्' इति।

XXIII

'संस्कृत दिवसः' रक्षाबन्धन दिने समाजतः सर्वकारतः च सर्वत्र देशे मानितो भवति। संस्कृतभाषायाः गुणान् वैशिष्ट्यानि च बोधयित्वा संस्कृत-हितैषिणः संस्कृतरक्षणाय, संस्कृत-प्रचाराय च संकल्पन्ते। तद् हिताय च कार्यं कर्तु कटिबद्धाः भवन्ति।

प्रश्नाः— 1. अस्य उद्धरणस्य समुचितं शीर्षकं लिखत।
2. 'संस्कृतदिवसः' कदा कुत्र च मानिती भवति ?
3. संस्कृतहितैषिणः किं कर्तुं कटिबद्धाः भवन्ति ?
4. संस्कृतहितैषिणः किमर्थं संकल्पन्ते।

उत्तराणि— 1. अस्य उद्धरणस्य समुचितः शीर्षकः 'संस्कृतदिवसः' अस्ति।
2. संस्कृतदिवसः रक्षाबन्धनदिने सर्वत्र देशे मानितो भवति।
3. संस्कृत-हितैषिणः संस्कृतहिताय कार्यं कर्तुं कटिबद्धाः भवन्ति।
4. संस्कृत-हितैषिणः संस्कृतरक्षणाय संस्कृतप्रचाराय च संकल्पन्ते।

XIV

पञ्चविंशतिः शतानि वत्सराणां व्यतीतानि यदा गौतमकुलोत्पन्नः सिद्धार्थः इमां भारतभुवम् अलञ्चकार स्वजन्मना। भागीरथ्या उत्तरे तीरे कपिलवस्तु नाम महनीयं नगरमेकमासीत्। शक्यवंशोत्पन्नाः शुद्धोदनस्तत्र राज्यमकरोत्। तस्य मायादेवी नाम सती भार्या अभवत्। तस्याश्च सिद्धार्थों नाम सुनुर्जन्म लभे। स शैशवादेव सुवृत्तो विवेकी चीभूत्।

प्रश्नाः— 1. उपरिलिखितस्य गद्यांशस्य समुचितं शीर्षकं लिखत।
2. सिद्धार्थः कदा स्वजन्मना भारतभुषम् अलञ्चकार ?
3. 'कपिलवस्तु' नाम नगरस्य कः शासकः आसीत् ?
4. मायादेवी का कीदृशी च आसीत् ?
5. सिद्धार्थे के गुणाः आसन् ?

उत्तराणि— 1. उपरिलिखितस्य गद्यांशस्य उचितः शीर्षकः 'सिद्धार्थः' अस्ति।
2. यदा पञ्चविंशतिः शतानि वत्सराणां व्यतीतानि तदा सिद्धार्थः स्वजन्मना भारतभुवम् अलञ्चकार।
3. शाक्यवंशोत्पन्नः शुद्धोदनः 'कपिलवस्तु' नाम नगरस्य शासकः आसीत्।

4. मायादेवी शुद्धोदनस्य सती भार्या आसीत्।
5. सिद्धार्थः शैशवादेव सुवृत्तो विवेकी चासीत्।

XV

विजयदशमी आर्याणां पर्व अस्ति। अस्यं प्रारम्भः भगवतः रामचन्द्रस्य कालात् अस्ति। अयं महोत्सवः आश्विनमासे शुक्लपक्षस्य दशम्यां सम्पाद्यते। अस्मिन्नेव दिवसे रामः रावणं हतवान्। इदं पर्व शिक्षयति यत् सदा असत्ये सत्यस्य विजयः भवति। क्षत्रिया अस्मिन् अवसरे अस्त्राणां शास्त्राणां पूजां च कर्वन्ति।

प्रश्नाः— 1. विजयदशमी केषां पर्व अस्ति?
2. विजयदशमी कदा सम्पाद्यते?
3. विजयदशमी किं शिक्षयति?
4. अस्मिन् अवसरे क्षत्रियाः किं कुर्वन्ति?

उत्तराणि— 1. विजयदशमी आर्याणाम् पर्व अस्ति।
2. विजयदशमी आश्विनमासे शुक्लपक्षस्य दशाम्यां सम्पाद्यते।
3. विजयदशमी शिक्षयति यत् सदा असत्ये सत्यस्य विजयः भवति।
4. अस्मिन् अवसरे क्षत्रियाः शस्त्राणां पूजां कुर्वन्ति।

XVI

दीपोत्सवः भारतीयानां प्रसिद्धं पर्व अस्ति। अस्य प्रारम्भः रामायणकालात् अभवत्। यदा श्रीरामचन्द्रः रावणं निहत्य अयोध्यायाम् आगच्छत् तदा जनैः स्वस्वगृहेषु मङ्गलसूचकाः दीपकाः प्रज्वालिताः। अस्मिन् उत्सवे जनाः लक्ष्मीपूजां कुर्वन्ति बंगप्रदेशे अस्मिन् अवसरे दुर्गापूजा भवति। अयमुत्सवः कार्तिकमासस्य अमावस्याम् सम्पाद्यते?

प्रश्नाः— 1. दीपोत्सवः कदा सम्पाद्यते?
2. यदा श्रीरामचन्द्रः अयोध्यायाम् आगच्छत् तदा जनाः किम् अकुर्वन्?
3. बंगप्रदेशे दीपोत्सवावसरे किं भवति?
4. दीपोत्सवे जनाः किं कुर्वन्ति?

उत्तराणि— 1. दीपोत्सवः कार्तिकमासस्य अमावस्यां सम्पाद्यते।
2. यदा श्रीरामचन्द्रः अयोध्यायाम् आगच्छत् तदा जनाः स्वस्वगृहेषु मङ्गलसूचकान् दीपकान् प्रज्वलितवन्तः।
3. बंगप्रदेशे दीपोत्सवावसरे दुर्गापूजा भवति।
4. दीपोत्सवे जनाः लक्ष्मीपूजां कुर्वन्ति।

XVII

एकदा कौरवपाण्डवानां शस्त्रकौशलपरीक्षा अभवत्। वृक्षशाखायां लक्ष्यरूपेण एकः कृत्रिमखगः स्थापित आसीत्। आचार्य द्रोणेन पूर्व युधिष्ठिरः आहूतः पृष्टश्च— लक्ष्यवेधवेलायां त्वं किं किं पश्यसि? युधिष्ठिरोऽब्रवीत—अहं खगं, वृक्षं, सर्वान् सहचरान्, भवन्तमपि च पश्यामि। उत्तरं श्रुत्वा द्रोणः अहसत्।

प्रश्नाः— 1. खगः कुत्र स्थापितः आसीत्?
2. केषां शस्त्रकौशलपरीक्षा अभवत्?

3. केन कः आहूतः पृष्टश्च ?
4. युधिष्ठिरस्य उत्तरं किम् आसीत् ?

उत्तराणि— 1. खगः वृक्षशाखायां स्थापित आसीत्।
2. कौरवपाण्डवानां शस्त्रकौशलपरीक्षा अभवत्।
3. आचार्यद्रोणेन युधिष्ठिरः आहूतः पृष्टश्च।
4. युधिष्ठिरस्य उत्तरम् आसीत्—अहं खगं वृक्षं सर्वान् सहचरान् च पश्यामि।

XVIII

संस्कृतभाषा देवभाषा, प्रायः सर्वासां भारतीयभाषाणां जननी, प्रादेशिक भाषाणाञ्च प्राणभूता इति। यथा प्राणी अन्नेन जीवति परन्तु वायुं विना अन्नमपि जीवनं रक्षितुं न शक्नोति, तदैव अस्मद्देश्य कापि भाषा संस्कृतभाषावलम्बं विना जीवितुमक्षमेति निःसंशयम्। अस्यामेव अस्माकं धर्मः, अस्माकपितिहासः, अस्माकं भूतं भविष्यञ्च सर्वं सुसन्निहितमस्ति।

प्रश्नाः— 1. उपरिलिखितस्य गद्यांशस्य समुचितं शीर्षकं लिखत।
2. संस्कृतभाषा कासां जननी कासाञ्च प्राणभूता अस्ति।
3. प्राणिनः प्राणरक्षार्थं किमावश्यकम् ?
4. संस्कृतभाषावलम्बं विना का जीवितुमक्षमा ?
5. संस्कृतभाषायां किं किं सुसन्निहितमस्ति ?

उत्तराणि— 1. समुचितः शीर्षकः—संस्कृतभाषा।
2. संस्कृतभाषा सर्वासां भारतीयभाषाणां जननी, प्रादेशिकभाषाणां च प्राणभूता अस्ति।
3. प्राणिनः प्राणरक्षार्थं वायुः आवश्यकः भवति।
4. संस्कृतभाषावलम्बं विना अस्मद्-देशस्य काऽपि भाषा जीवितुमक्षमा।
5. संस्कृतभाषायाम् अस्माकं धर्मः, अस्माकमितिहासः, अस्माकं भूतं भविष्यञ्च सर्वं सुसन्निहितमस्ति।

अभ्यास के लिए अनुच्छेद

I

काशीदेशवासी कोऽपि तण्डुलदेवनामा राज्ञे स्वस्ति इति उक्त्वा अतिष्ठत्। राजा तम् अपृच्छत्—सुमते! कुत्र ते निवासः ? तण्डुलदेवः अवदत्—श्रीमन् मालवभूपाल, यत्र रिक्तशाखिनः वाणी कृपाणी भवति, अहं तत्र वसामि। तुष्टः राजा तस्मै गजेन्द्रसप्तकम् अयच्छत्।

प्रश्नाः— 1. तण्डुलदेवः कः आसीत् ?
2. तण्डुलदेवः कस्मै स्वस्ति इति अवदत् ?
3. राजा तण्डुलदेवं किम् अपृच्छत् ?
4. तुष्टः राजा तण्डुलदेवाय किम् अयच्छत् ?
5. राजा किमर्थम् तुष्टः आसीत् ?

II

ततो राजा कालिदासं दूरे समायान्तं वीक्ष्य सानन्दम् आसनात् उत्थाय 'सुकवे, मत्प्रियतम' अद्य कथं विलम्बः क्रियते इति भाषमाणः पञ्चषट्पदानि सम्मुखो गच्छति। ततो निखिलाः सभा आसनात् उत्थिता। सर्वे सभासदश्चमत्कृताः। वैरिणश्चास्य विच्छायवदना बभूवुः। ततौ राजा निजकरकमलेन अस्य करकमलम् अवलम्ब्य स्वासनदेशम् प्राप्य, तं च सिंहासनम् उपवेश्य स्वयं च तदाज्ञया तत्रैवोपविष्टः।

प्रश्नाः— 1. राजा दूरे समायान्तं कम् अपश्यत्?
2. आसनीत् का उत्थिता?
3. सर्वे सभासदः कथम् अभवन्?
4. तस्य वैरिणः कीदृशाः बभूवुः?
5. राजा कालिदासं कुत्र उपवेशयति स्म?

III

ततः सन्तुष्टो राजा निज सिंहासने भोजं निवेशयित्वा छत्रचामराभ्यां भूषयित्वा तस्मै राज्यं ददौ। ततः परलोकपरित्राणाय मुञ्जो निजपट्टराज्ञीभिः सह तपोभूमि गत्वां परं तपस्तेपे। ततो भोजभूपालः देवब्राह्मणप्रसादाद् राज्यं पालयामास।

प्रश्नाः— 1. सन्तुष्टो राजा निजसिंहासने कं न्यवेशयत्?
2. मुञ्जः कैः सह तपोभूमिम् गतः?
3. भोजः केषां प्रसादात् राज्यम् अपालयत्?

IV

एकदा एकस्य शशकस्य वारः समायातः। स भयात् भीतः अतिष्ठत्। त सिंहस्य मारणोपायम् अचिन्तयत्। स तस्य पार्श्वे चिरात् प्राप्तः। बुभुक्षितः सिंह विलम्बस्य कारणम् अपृच्छत्। सह आह—मार्गे अपरः सिहः मां रोधयित्वा अपृच्छत् कुत्र यासीति।

प्रश्नाः— 1. एकदा कस्य वारः समायातः?
2. शशकः किम् अचिन्तयत्?
3. शशकः कस्य पार्श्वे चिरात् प्राप्तः?
4. बुभुक्षितः सिंहः किम् अपृच्छत्?
5. अपरः सिंहः शशकं किम् अपृच्छत्?

V

एकस्मिन् वने एकः सिहः वसति स्म। सः तत्रत्यान् वनजन्तून् प्रतिदिनं तुद स्म। वनजन्तुभिः चिन्तितम्—'अयं तु व्यर्थं महान् जन्तुसंहारः इति।' ते सिंहं गत्वा प्रार्थयन्ति स्म—'भो वनराज, भवान् एवं जन्तुसंहारं न करोतु। अस्माकं मध्ये क्रमशः एकैकः भवत्पार्श्वे भोजनार्थं प्रतिदिनम् आयास्यति तेन भवान् स्वतृप्ति करोतु। सिंह तत स्वीकृतवान्।

प्रश्नाः— 1. सिंहः कुत्र न्यवसत्?
2. वनजन्तून् कः तुदति स्म?
3. वनजन्तुभिः किं चिन्तितम्?

4. सिंहसमीपं गत्वा के प्रार्थयन्ति स्म ?
5. सिंहः प्रार्थनां श्रुत्वा किम् अकरोत् ?

VI

धर्मक्षेत्रे कुरुक्षेत्रे समवेतानां युयुत्सुकानां कौरवाणां पाण्डवानां च मध्ये भगवता कृष्णेन अर्जुनम् अभिलक्ष्य गीता वाणी श्रीमद्भगवद्गीता इति नाम्ना वर्तते। अष्टादेशपर्वसु सप्तशतश्लोकेषु महर्षिवेदव्यासेन निबद्धा इयं रचना महाभारतस्य मध्यभागे दीपस्तम्भ इव स्थिता प्रतीयते।

प्रश्नाः— 1. धर्मक्षेत्रं किमस्ति ?
2. धर्मक्षेत्रे के समवेताः ?
3. भगवान् कृष्णः कम् अभिलक्ष्य गीताम् उक्तवान् ?
4. गीतायां कति पर्वाणि सन्ति ?
5. महाभारतस्य मध्ये गीता कथं प्रतीयते ?

VII

भारतस्य संविधाने प्रधानमन्त्रिणः पदम् अतीव महत्त्वपूर्णम् वर्तते। सः राष्ट्रस्य असिद्धानि कार्याणि साधयितुं प्रभवति। सः प्रमुखदलस्य नेता अस्ति। सः मन्त्रिमण्डलस्य अध्यक्षः वर्तते। सः राष्ट्रम् उन्नतिपथं नेतुम् अहोरात्रं प्रयतेत इति काम्यते।

प्रश्नाः— 1. भारतीय-संविधाने किम् अतिमहत्त्वपूर्णम् अस्ति ?
2. कीदृशानि कार्याणि साधयितुं प्रधानमन्त्री प्रभवति ?
3. प्रधानमन्त्री कस्य नेता अस्ति ?
4. मन्त्रिमण्डलस्य नेता कोऽस्ति ?
5. प्रधानमन्त्री किमर्थम् अहोरात्रं प्रयतेत ?

VIII

एकः विदेशीयः वर्षमेकं भारते न्यवसत्। तस्य प्रतिगमनकाले एकेन भारतीयेन पृष्टम्—भारतनिवासेन तव विचारेषु किंचित्परिवर्तनं किम् ? विदेशीयेन उक्तम्—मूलभूतं परिवर्तनं जातम्, आस्तिकोऽस्मि संजातः। भारतीयः प्रसन्नः सन् उक्तवान्—"एतदेव भारतस्य धर्मप्राणता ! कथमेतादृशं जातम् ?" सोऽवदत्—"नात्र मया कोऽपि जनः परिश्रमेण ऋतेन च कार्यं कुर्वन् दृष्टः तथापि सर्वे उदरपूरं भुञ्जन्ति इति सिध्यति एव कोऽपि अलौकिकशक्तिसम्पन्नः भारतपक्षपाती अकर्मण्यकृपालुः। स च ईश्वरं विहाय कोऽन्यः भवितुमर्हति ?

प्रश्नाः— 1. अस्य शीर्षको लिख्यताम् ?
2. कियत्कालं विदेशीयः भारते न्यवसत् ?
3. भारतनिवासेन विदेशीयः किं संजातः ?
4. परिश्रमेण विना उदरपूरं के भुञ्जन्ति ?
5. भारतीयः कथं प्रसन्नः आसीत् ?
6. विदेशीयस्य आस्तिकतायाः मूलम् किम् आसीत् ?
7. ईश्वरः कथम् अलौकिक शक्तिसम्पन्नः अस्ति ?
8. आस्तिकः कः भवति ?

IX

एकः वृद्धप्रिय काकबलिं गृह्णन् गृहात् निर्गत्य काकान् आह्वयति स्म। समायातेषु काकेषु तारं रटन्तं कंचित् काकं श्रुत्वा अतीव भीता विप्रपत्नी अवदत्—"मादृशानां पतिव्रतास्त्रीणां क्रूरध्वनिश्रवणं न सह्यम्।" तद्वचनं श्रुत्वा राजा व्यचिन्तयत्—"इयं तरुणी नुनं दुःशीला वर्तते या स्वपातिव्रत्यं स्वयमेव कीर्तयति।"

प्रश्नाः— 1. अस्य शीर्षको लिख्यताम्।
2. वृद्धप्रियः कान् आह्वयति स्म?
3. विप्रपत्नी कथमं भीता आसीत्?
4. विप्रपत्नी कथं दुःशीला आसीत्?

X

'दहेज' इति शब्दः समाजस्य कलङ्कः अस्ति। तेन निर्धनानां कन्यकाः बहुकालम् अविवाहिताः भवन्ति। मध्यकाले इयं प्रथां सामन्त-वर्गे राजसु एव च आसीत् परम् अद्य जनसाधारणे अपि अस्य प्रभावो वर्तते। कन्यायाः पित्रा किमर्थं धनराशिः दीयते इति अनुत्तरितः प्रश्नः।

प्रश्नाः— 1. समाजस्य कलङ्कः कः अस्ति?
2. अविवाहिताः काः भवन्ति?
3. मध्यकाले दहेज-प्रथा कस्मिन् वर्गे आसीत्?
4. कोऽनुत्तरितः प्रश्नः?

XI

मुहम्मदगोरिणा पृथ्वीराजस्य वन्दीकरणदिने एव भारतवर्षस्य स्वातन्त्र्यम् अपहृतम्। तदनन्तरं भारते परकीयाणां अनेकानि आक्रमणानि अभवन्, मुगलानां च साम्राज्यं स्थापितम्। अस्मिन् संघर्षयुगे एव प्रतापस्य शिवराजस्य च नाम प्रकटितम्। वयं मुगलसाम्राज्यम् उन्मूलयितुं कटिबद्धाः आस्म परं चिकित्साकरणे अपि रोगः विवर्धित एव।

प्रश्नाः— 1. भारतस्य स्वातन्त्र्यं कदा अपहृतम्?
2. मुहम्मदगोरिणा को वन्दीकृतः?
3. भारते केषां साम्राज्यं स्थापितम्?
4. संघर्षयुगे किं प्रकटितम्?
5. चिकित्साकरणे कथं रोगो विवर्धितः?

XII

रजकस्य एकः दुर्बलः गर्दभः आसीत्। एकदा रजकः कुतश्चित् व्याघ्रचर्म प्राप्तवान्। से तेन रासभं प्रच्छाद्य यवक्षेत्रेषु अत्यजत्। रासभः तत्र बहुकालं यावत् रात्रौ यवभक्षणम् अकरोत्। एकदा रासभीं दृष्ट्वा तस्याः शब्दं श्रुत्वा स्वयमपि शब्दापयितुम् आरब्धः। क्षेत्रपालाः तं रासभं ज्ञात्वा लगुडप्रहारैः हतवन्तः।

प्रश्नाः— 1. दुर्बलः कः आसीत्?
2. रजकः किं प्राप्तवान्?
3. रजकः यवक्षेत्रेषु कम् अत्यजत्?

4. रात्रौ यवभक्षणं कः अकरोत्?
5. क्षेत्रपालाः किमर्थं रासभं हतवन्तः?

XIII

1919 तमे वर्षे अप्रैलमासे 13 तारिकायाः वैशाखीपर्वणः दिनं स्वतन्त्रतायाः इतिहासे विशेषं महत्त्वम् अर्हति। तदा जनरल डायरमहोदयेन निःशस्त्रनागरिकाणाम् उपरि गोलिकावर्षणम् कृतम्। सिखयुवकेन ऊधमसिंहेन डायरं हत्वा तेषाम् अत्याचाराणां प्रतिशोधः कृतः।

प्रश्नाः— 1. वैशाखीपर्वणः महत्त्वपूर्णं दिनं किम् अस्ति?
2. निःशस्त्रनागरिकाणाम् उपरि गोलिकावर्षणं केन संजातम्?
3. ऊधमसिंहः कः आसीत्?
4. ऊधमसिंहः अत्याचाराणां प्रतिशोधं कथं कृतवान्?

XIV

ततः कदाचित् भोजराजः कालिदासं प्रति प्राह—"सुकवे, त्वम् अस्माकं चरमग्रन्थं पठ।" ततः क्रुद्धो राजानं विनिन्द्य कालिदासः क्षणेन तं देशं त्यक्त्वा विलासवत्या सह एकशिलानगरं प्राप। ततः कालिदासवियोगेन शोकाकुलं कालिदासं मृगयितुं राजा कापालिकवेषं घृत्वा क्रमेण एकशिलानगरं प्राप।

प्रश्नाः— 1. कालिदासः कः आसीत्?
2. कालिदासः कथं क्रुद्धो जातः।
3. कालिदासः कया सह एकशिलानगरं प्राप?
4. कालिदासं मृगयितुं भोजः किं चकार?

XV

एकदा वाक् शरीरात् उदक्रामत। सा संवत्सरं प्रोष्य प्रत्यागता प्रपच्छ—"कथं भवद्भिः मया विना जीवितम्?" प्राणादयः ऊचुः—यथा मूका अवदन्तोऽपि प्राणेन श्वसन्तः चक्षुषा पश्यन्तः श्रोत्रेण शृण्वन्तो मनसा ध्यायन्तो जीवन्ति एवं वयमपि अजीवाम।" ततश्चक्षुर्निरगच्छत् संवत्सरं प्रोष्य प्रत्यावर्त्य अपृच्छत्—"कथं यूयं मद्गते अजीवत?

प्रश्नाः— 1. शरीरात् का उदक्रामत्?
2. वाक् कियदवधि प्रावसत्?
3. वाचमनु किं निरगच्छत्?
4. वाचमनन किं निरगच्छत्?
5. शरीरे केषां श्रेष्ठत्वम् वर्तते?

XVI

त्रेतायुगे मर्यादापुरुषोत्तमः श्रीरामचन्द्रः पितुः आज्ञां पर्यपालयत्। स चतुर्दशवर्षं यावत् वने न्यवसत्। तत्र न्यवसन् तस्य पत्नी सीता राक्षसराजेन अपहृता। वानराणां साहाय्येन स राक्षसराजं रावणं जघान। रावणस्य बन्धनागरात् सीतां विमोच्य सीतया लक्ष्मणेन च सहितः सः अयोध्यानगरीं निवृत्तः।

प्रश्नाः— 1. मर्यादापुरुषोत्तमः कः आसीत्?
2. रामचन्द्रस्य पत्नी का आसीत्?
3. रामचन्द्रः किमर्थं वने न्यवसत्?
4. सः राक्षसराजं किमर्थं हतवान्?
5. सीता कस्या बन्धनागारात् विमुक्ता?
6. केषां साहाय्येन रामचन्द्रः राक्षसान् हतवान्?
7. लक्ष्मणः कः आसीत्?
8. अयोध्यानगरीं के के निवृत्ताः?

XVII

सङ्कटे समुपस्थिते सति अभिमानिनं क्रुद्धस्वभावं च राजानं तस्य स्वजनाः एव घ्नन्ति। यो भूपः सवकार्यं सम्यक्तया न करोति स शीघ्रमेव राज्यभ्रष्टो भवति। लोकाः लोष्ठानां रजसश्चापि महत्त्वम् आकलयन्ति परं न राज्यभ्रष्टस्य राज्ञः।

प्रश्नाः— 1. क्रुद्धस्वभावं राजानं के घ्नन्ति?
2. कीदृशो राजा राज्यभ्रष्टो भवति?
3. लोकाः केषां महत्त्वम् आकलयन्ति?
4. लोकाः केषां महत्त्वं न आलोकयन्ति?

XVIII

एकदा हर्षः प्रातःकालस्य आदौ स्वप्ने दावाग्नौ दह्यमानम् एकं सिहं स्वशावकान् विमुच्य पावकं प्रविशन्तीं सिहीं च अपश्यत्। एतद् दृष्ट्वा तस्य मनसि अभवत् यत् संसारे प्रेम्णः बन्धनं लोहादपि दृढतरं भवति यतो हि तिर्यञ्चोऽपि तथा कुर्वन्ति। आगामिदिने स कुरङ्गकनाम्नः दूतात् पितुः रुग्णतायाः समाचारम् अश्रृणोत् युगपदेव च कैश्चित् पुरुषैः सह पितुः सकाशं समागतः।

प्रश्नाः— 1. पावके का प्राविशत्?
2. अग्नौ दह्यमानः कः आसीत्?
3. प्रेम्णो बन्धनं कीदृशं भवति?
4. दूतस्य कि नाम आसीत्?
5. हर्षः दूतमुखात् किम् अश्रृणोत्?

XIX

प्राचीनकाले संस्कृतमेव बृहत्तरभारतस्य राज्यभाषा लोकभाषा चासीत्। तदानीं सर्वे जना संस्कृतेन एव व्यवहरन्ति स्म। एकोऽपि भारतीयः तादृशौ नासीत् यः संस्कृतं न जानाति स्म। भारतीयेतिहासस्य स्वर्णकाले संस्कृतमेव राष्ट्रभाषापदे व्यराजत्।

प्रश्नाः— 1. बृहत्तरभारतस्य राज्यभाषा का आसीत्?
2. प्राचीनकाले जनाः कथं व्यवहरन्ति स्म?
3. को जनः संस्कृतं न जानाति स्म?
4. राष्ट्रभाषापदे का भाषा व्यराजत्?

XX

कस्मिश्चिद् वने एकः साधुः प्रतिवसति स्म। स प्रतिदिनं भिक्षायै नगरं गच्छति स्म। एकदा स भिक्षायै एकं गृहम् अगच्छत्। तत्र एका स्त्री विषाक्तां रोटिकां तस्मै प्रायच्छत्। अन्यस्मिन् दिने तस्याः बुभुक्षितः। पुत्रः साधोः कुटीरं गत्वा भोजनम् आयाचत्। साधुः तस्मै तामेव रोटिकां प्रायच्छत्। भोजनोपरान्तं सः पुत्रः मृतः। यः यथा करोति स तथैव फलम् आप्नोति।

प्रश्नाः— 1. साधुः किमर्थं नगरं गच्छति स्म?
2. स्त्री साधवे किं प्रायच्छत्?
3. साधोः कुटीरं क आगतः?
4. पुत्रः कस्मात् कारणात् मृतः?
5. अनया कथया का शिक्षा प्राप्यते?

अष्टम अध्याय

अनुवाद-विधि

किसी एक भाषा के वाक्यों को दूसरी भाषा में बदल देना अनुवाद कहलाता है। अनुवाद एक कला है। किसी भी कला को सीखने के लिए निरन्तर अभ्यास की आवश्यकता रहती है। अनुवाद-कला को सीखने के लिए दो बातों का अभ्यास जरूरी है—सर्वप्रथम, व्याकरण के छोटे-बड़े सभी नियमों का ज्ञान हो और दूसरे, प्रत्येक अर्थ को प्रकट करने के लिए उचित शब्द का ज्ञान हो। यदि एक अर्थ को प्रकट करने के लिए अनेक शब्द उपलब्ध हों, तो प्रस्तुत सन्दर्भ में कौन-सा शब्द भाव एवं प्रसंग की दृष्टि से संगत बैठता है, इसका विवेक वही कर सकता है जिसने उस भाषा के अधिकाधिक साहित्य का अनुशीलन किया हो। अनुवाद सीखने का सरल उपाय यह है कि संस्कृत वाक्यों को पढ़कर हिन्दी या अंग्रेजी भाषा में पहले उसका अनुवाद कर लेना चाहिए। ऐसे अंग्रेजी या हिन्दी के वाक्यों को फिर से संस्कृत बनाकर मूल संस्कृत वाक्यों से उनकी तुलना करनी चाहिए। अनुवाद का अभ्यास करने के लिए इस पद्धति का अवलम्बन अत्यन्त उपयोगी है।

अनुवाद में यह ध्यान रखना जरूरी होता है कि जिस वाक्य का अनुवाद किया जाता है उसके अर्थ और भावार्थ में कोई अन्तर नहीं आना चाहिए। प्रत्येक भाषा के व्याकरण के अपने-अपने नियम होते हैं। इसलिए भाषा के नियमों का अच्छी तरह से ज्ञान होना चाहिए। हमें हिन्दी भाषा के साथ-साथ संस्कृत भाषा के व्याकरण का ज्ञान भी अच्छी तरह होना चाहिए। संस्कृत भाषा के व्याकरण में भी विशेष रूप से निम्न बातों का ज्ञान होना जरूरी है :

1. संस्कृत व्याकरण पढ़ते समय हमें यह अनुभव हुआ कि संस्कृत शब्दों में संयुक्त अक्षर बहुत हैं तथा वहाँ अनुस्वार, विसर्ग और हलन्त आदि का विशेष महत्त्व है, अतः संस्कृत के शब्दों का उच्चारण ठीक-ठीक आना चाहिए। इसके अभाव में अशुद्ध उच्चारण होने पर लिखने में भी अशुद्धियाँ होना स्वाभाविक है।

2. संस्कृत में दूसरी बड़ी कठिनाई शब्दों के लिङ्ग-ज्ञान की है। संस्कृत शब्दों के लिङ्गों के लिए कोई विशेष नियम नहीं हैं। यह हमें बार-बार के अभ्यास से ही पता चलता है कि अमुक शब्द पुंल्लिङ्ग है, स्त्रीलिङ्ग है या नपुंसकलिङ्ग है। अनेक ऐसे शब्द हैं जिनका हम हिन्दी में किसी और लिङ्ग में प्रयोग करते हैं किन्तु संस्कृत में उनका लिङ्ग दूसरा होता है। जैसे, मित्र शब्द 'दोस्त' अर्थ में हिन्दी में पुंल्लिङ्ग में होता है, किन्तु संस्कृत में नपुंसकलिङ्ग में होता है। संस्कृत में यदि हम मित्र शब्द का पुंल्लिङ्ग में प्रयोग करते हैं तो इसका अर्थ 'सूर्य' हो जाता है।

3. संख्यावाचक शब्दों (एक, द्वि, त्रि, इत्यादि) तथा सर्वनाम शब्दों (यत्, तत्, सर्व इत्यादि) के रूप पुंल्लिङ्ग, स्त्रीलिङ्ग तथा नपुंसकलिङ्ग में अलग-अलग बनते हैं, अतः इन शब्दों के रूपों को तीनों लिङ्गों में याद करना जरूरी होता है, क्योंकि जब

हम अनुवाद करते हैं तो ये शब्द प्रायः विशेषण के रूप में आते हैं और विशेषणों के रूप में इनका उसी लिङ्ग के रूप का प्रयोग करना होगा जिस लिङ्ग में 'विशेष्य' होता है। विशेष्य-शब्दों के अनुसार ही विशेषण के लिङ्ग होते है।

4. संस्कृत वाक्यों के अनुवाद में धातु-रूपों का विशेष महत्त्व है। पहले तो हमें यह पता होना चाहिए कि अमुक धातु किस गण की है। दूसरे इस बात का ज्ञान होना चाहिए कि यह धातु परस्मैपदी है, आत्मनेपदी है या उभयपदी है। फिर हमें यह देखना है कि वाक्य में जिस काल या अवस्था का निर्देश है उसके अनुसार कौन-से लकार का प्रयोग होना चाहिए। किन्तु इतने मात्र में काम नहीं चलेगा। अन्त में हमें यह देखना है कि वाक्य कर्तृवाच्य में है, कर्मवाच्य में है या भाववाच्य में। यह सब निश्चित हो जाने पर वाच्य के अनुसार कर्त्ता के पुरुष (प्रथम, मध्यम तथा उत्तम) तथा वचन आदि का ज्ञान पूर्ण रूप से करना होगा। जिस पुरुष तथा वचन का कर्त्ता होगा, क्रिया-रूप भी उसी पुरुष तथा वचन का होगा।

5. अनुवाद में णिजन्त (प्रेरणार्थक क्रिया), कृदन्त शब्द एवं उपसर्ग आदि का ज्ञान भी आवश्यक है। धातुओं के पूर्व उपसर्ग कैसे लगाया जाता है, इसका पता होना चाहिए। पहले धातु का लकार रूप बना लिया जाता है तथा उसके पश्चात् धातु रूप से पहले उपसर्ग लगाया जाता है, जैसे—गम् धातु का लङ् लकार प्रथम पुरुष एकवचन में अगच्छत् रूप बन जाने पर इसके पूर्व प्रति तथा आ उपसर्ग लगाने से प्रत्यागच्छत् (प्रति + आ + अगच्छत्) रूप बनेगा। ऐसे ही कृदन्त रूपों में यदि क्त्वा का रूप हो तथा उससे पूर्व उपसर्ग आ गया हो तो क्त्वा को ल्यप् हो जायेगा। श्रु धातु से क्त्वा में श्रुत्वा रूप बनता है परन्तु इसके पूर्व प्रति उपसर्ग आने से प्रतिश्रुत्य रूप हो जाएगा।

6. अनुवाद में कारक, विभक्तियों तथा उपपद-विभक्तियों का भी ध्यान रखना चाहिए। प्रायः परीक्षा में अनुवाद के लिए जो वाक्य आते हैं उनमें उपपद-विभक्ति से सम्बन्धित कुछ वाक्य अवश्य होते हैं। कारक रूपों में भी वचन का ध्यान रखा जाना जरूरी है।

7. संस्कृत में विशेषण और विशेष्य का अनुवाद में बहुत महत्त्व रहता है। कई बार तो हिन्दी भाषा में वाक्य में विशेषण विशेष्य से पहले आता है, किन्तु अनेक बार ऐसा भी होता है कि विशेष्य के बाद विशेषण आता है। चाहे विशेषण विशेष्य से पहले आये या विशेष्य के बाद में आये, चाहे विशेषण गुणवाचक हो अथवा परिमाणवाचक, चाहे वह सार्वनामिक हो या संख्यावाचक, लिङ्ग और वचन की दृष्टि से जो लिंग और वचन विशेष्य का होता है वहीं लिंग और वचन विशेषण का रहेगा।

8. क्रिया-विशेषण शब्द अव्यय होते हैं। उनके रूपों में कोई परिवर्तन नहीं होता। हमें अनुवाद के लिए संस्कृत के अव्यय शब्दों तथा उनके अर्थों का पूरा-पूरा ज्ञान होना चाहिए, तभी हम वाक्य के अन्तर्गत सभी शब्दों का अनुवाद कर सकते हैं।

9. अनुवाद को उत्तम बनाने के लिए हम वाक्य में संस्कृत शब्दों के बीच में सन्धि कर सकते हैं या फिर ऐसे शब्दों का चयन करना चाहिए, जिनमें सन्धि की अपेक्षा कम-से-कम हो।

अभ्यास 1

1. चार बालिकाओं में शकुन्तला कौन-सी है? — चतसृषु बालासु शकुन्तला कतमा?
Which of the four girls is Shakuntala?
2. साधुओं का चरित्र अनुकरण के योग्य है। — साधूनां चरित्रम् अनुकरणनीयम्।
The conduct of the mendicants is worthy of immitation.
3. आप दोनों के पुत्र कहाँ पढ़ते हैं? — भवतः पुत्रौ कुत्र पठतः?
Where do the sons of both of you study?
4. क्या तुम्हारी धन की इच्छा बढ़ गई है? — किं तव धनलिप्सा वर्धिता?
Has your desire for wealth increased?
5. उस के सब अर्थ सिद्ध हो गये। — तस्य सर्वार्थाः सिद्धाः।
All his aims were accompolished.
6. पेड़ के कोटर में सांप रहता है। — वृक्षस्य कोटरे सर्पः न्यवसत्।
There lived a snake in the hollow of the tree.
7. शेरों के मुँह किसने धोये? — सिंहानां मुखानि केन प्रक्षालितानि?
Who washed the mouths of the lions?
8. तुम सत्य व धर्म के मार्ग में स्थित हो। — त्वं सत्यस्य धर्मस्य च मार्गे स्थितोऽसि।
You stand on the path of truth and righteousness.

अनुवाद करो (Translate)

1. आप के भय से वह मेरी शरण आया है।
He has come to my resort due to the fear from you.
2. राजा के वचनों को सुन कर पक्षी बोला।
The bird spoke after listening to the words of the king.
3. धर्म को आठ प्रकार का माना जाता है।
Dharma is considered to be of eight types.
4. उस का फल उसे अवश्य मिलेगा।
He will certainly get his fruit.
5. वह लेट कर पढ़ता है इस कारण उस की कमर सीधी नहीं है।
He reads in a lying position, so his back is not straight.
6. सन्तोष का फल मीठा होता है।
The fruit of contentment is sweet.
7. उसको दिल का रोग हो गया।
He had a heart attack.
8. रमा घर का काम अच्छा करती है।
Rama is well in household work.

9. उसे विद्यालय के काम की चिन्ता नहीं है।
He is not worried about the school work.
10. मोहन की गाड़ी में कौन सो रहा है?
Who is sleeping in the Mohan's cart ?

अभ्यास 2

1. आकाश मेघों से व्याप्त है। आकाशः मेघैः संवृतः अस्ति।
The sky is overcast with clouds.
2. यह घड़ी आप ने किस से बनवाई है? इमां घटिकां भवान् केन कारितवान्?
To whom did you ask to make this watch ?
3. वह पैर से लंगड़ा है। सः पादेन खंजः अस्ति।
He is lame of leg.
4. वह दिल से साफ है। सः मनसा पवित्रः आस्ति।
He is pure from heart.
5. जलप्लावन से क्या हानि होती है? जलप्लावनेन का हानिः भवति?
What are the demerits of the floods?
6. तुम ब्रह्मचारियों के साथ खेलो। यूयं वटुभिः सह क्रीडत।
You play with the Vatus.
7. शिष्यों के बताने पर महर्षि वहाँ आये। शिष्यैः निवेदितः महर्षिः तत्रागच्छत्।
The great sage did come there when the disciples told him.
8. तुम दोनों मेरे साथ युद्ध करो। युवां मया सह युद्धं कुरुतम्।
Both of you fight with me.
9. वे दोनों अपनी माँ के साथ रहते थे। तौ स्वजनन्या सह न्यवसताम्।
Both of them lived with their mother.
10. वह धर्मपूर्वक लोगों की रक्षा करता है। सः धर्मेण जनान् रक्षति।
He protects the people with Dharma.

अनुवाद करो (Translate)

1. तुम से यह चित्र देखा जाना चाहिये।
This picture should be seen by you.
2. भिक्षुक के द्वारा धनिक से धन माँगा जाता है।
Money is asked for from the rich by the beggar.
3. माता के द्वारा बालक विद्यालय ले जाया जाता है।
The boy is taken to the school by the mother.
4. बालक के द्वारा चन्द्र बिम्ब देखा गया।
The moon-orbit was seen by the boy.
5. उस के द्वारा पश्चाताप किया गया।
Repentance was committed by him.

6. आत्मा से आत्मा का उद्धार करना चाहिये।
Soul should be elevated through soul.
7. वह दोनों हाथों से दान देता है।
He donates with both hands.
8. वह मन से अच्छी तरह सोच कर कार्य करता है।
He works after well-thought.
9. धन से क्या नहीं मिल सकता?
What can't be achieved by the wealth ?
10. जिस मार्ग से महाजन जाते हैं वही मार्ग है।
That is the path which is used by the great persons.

अभ्यास 3

1. उसने यान को देख कर सोचा। सः यानम् अवलोक्य अचिन्तयत्।
Seeing the cart, he thought.
2. उसने अच्छी तरह सोचकर प्रश्न पूछा। सः सम्यक् विचार्य प्रश्नम् अपृच्छत्।
He asked the question after well-thought.
3. वह फल लेकर घर आई। सा फलानि आदाय गृहमागता।
She taking the fruits, came home.
4. ज्ञान प्राप्त कर तुम सुखी हो जाओगे। ज्ञानं प्राप्य त्वं सुखी भविष्यसि।
You will be happy after getting knowledge.
5. घर आकर वह आसन पर बैठ गया। गृहमागत्य सः आसने उपविशत्।
He sat on the seat after coming home.
6. सूर्य की पूजा कर के भोजन करो। सूर्यम् उपास्य भोजनं कुरु।
Take your meals after worshipping the sun.
7. मैं सौ फल खरीदना चाहता हूँ। अहं फलानां शतं क्रेतुमिच्छामि।
I want to buy hundred fruits.
8. वह दिल्ली जाना चाहता है। सः दिल्ली-नगरं गन्तुमिच्छति।
He wants to go to Delhi.
9. उसने पशु को छोड़ने के लिए कहा। सः पशुं त्यक्तुमुक्तवान्।
He asked to leave the animal.
10. वह पशु को भूमि पर डाल कर घर चला गया। सः पशुं भुवि निक्षिप्य गृहं प्रचलितः।
He went home, after throwing the animal on the earth.

अनुवाद करो (Translate)

1. क्या यहाँ तुम सोने के लिए आये हो?
Have you come here to sleep ?

2. क्या तुम्हें वहाँ जाने के लिए गाड़ी चाहिये?
Do you want car to go there ?
3. क्या मुझे भी उन्हें प्रणाम करना चाहिये?
Should I too bow to them ?
4. क्या सूर्य को भी दीपक की आवश्यकता है?
Does even the sun need the lamp ?
5. क्या पढ़ने के लिए भी तुम स्वतन्त्र नहीं हो?
Are you not free even to make your studies ?
6. क्या छूने से ये फल खराब हो जायेंगे?
Will these fruits be rotten by touching ?
7. क्या धर्म से अर्थ और काम प्राप्त हो सकते हैं?
Can wealth and sex be obtained by Dharma ?
8. क्या विद्यालय से वह अभी तक नहीं आया?
Did he not come from the school as yet ?
9. क्या सुबह से तुम उस की इन्तजार कर रही हो?
Are you waiting for him since morning ?
10. क्या तुम मुझे मरने के बाद भी याद करोगे?
Will you remember me even after my dealth ?

अभ्यास 4

1. पके हुये फल देखकर वे लालायित हुए। Seeing the ripe fruits, they were anxious to get them. — पक्वानि फलानि दृष्ट्वा ते लालायिताः अभवन्।
2. उन्होंने केवल बीस फल खरीदे। They purchased twenty fruits only. — तैः केवलं विंशतिः फलानि क्रीतानि।
3. श्री कृष्ण का जन्मोत्सव भी वर्षाकाल में होता है। The Birth day festival of Lord Krishna is also held in the rainy season. — भगवतः कृष्णस्य जन्मोत्सवः अपि वर्षाकाले भवति।
4. काम से क्रोध उत्पन्न होता है। The anger is born out of desire. — कामात् क्रोधः अभिजायते।
5. वर्षा में तालाब जल से भर जाते हैं। The ponds are full of water during rainy season. — वर्षायां सरांसि जलपूर्णानि सन्ति।
6. काले जामुन स्वादिष्ट होते हैं। Black Jamun fruits are full of taste. — श्यामवर्णानि जम्बूफलानि स्वादूनि भवन्ति।
7. सुप्त बीज भी वर्षाकाल में उग जाते हैं। Seeds which are asleep too grow in the rainy season. — सुप्तानि बीजानि अपि वर्षाकाले प्ररोहन्ति।

8. मेघों का गर्जन सुनकर वन में मोर नाचते हैं। — मेघानां गर्जनं श्रुत्वा वने मयूराः नृत्यन्ति।
Listening to the thundering sound of the clouds, the peacocks dance in the jungle.
9. नये पत्ते सब के मन को हर लेते हैं। — नवपल्लवानि सर्वेषां मनांसि हरन्ति।
New leaves attract every mind.
10. एक वर्ष में बारह महीने होते हैं। — एकस्मिन् वर्षे द्वादश मासाः भवन्ति।
There are twelve months in a year.

अनुवाद करो (Translate)

1. इन्द्र का वचन सुनकर वह प्रसन्न हो गया।
Listening to the Indra's words, he became happy.
2. वह प्रातः चार बजे उठता है।
He gets up at four in the morning.
3. हाथ मुँह धोकर वह घूमने के लिए बाहर निकल जाता है।
He goes out for a walk after washing her hands and mouth.
4. वह गुरुजनों की सेवा करता है।
He serves his teachers.
5. वह बड़ों की आज्ञा शिरोधार्य करता है।
He carries out the order of the elders.
6. वह अपना पाठ मन लगाकर याद करता है।
He learns his lesson with concentration.
7. वह सदा ठंडे पानी से स्नान करता है।
He always takes a bath from the cold water.
8. वह नित्य व्यायाम करता है।
He takes exercise daily.
9. वह स्वाध्याय से कभी प्रमाद नहीं करता।
He never ignores self-study of the scriptures.
10. वह प्रातः तथा सायं सन्ध्या करता है।
He worships God in the morning and evening.

अभ्यास 5

1. वह आपके साथ कब से रहते हैं? — ते भवता सह कदा प्रभृति निवसन्ति?
Since when do they live with you?
2. यह पत्र आप को कहाँ से मिला? — इदं पत्रं भवान् कुतः लब्धवान्?
From where did you get this letter?
3. यहाँ कितना जल है? — अत्र कियज्जलं विद्यते?
How much water is there at this place?
4. तुम यहाँ कितने छात्र रहते हो? — यूयम् अत्र कति छात्राः निवसथ?
How many students live here?

5. यह कैसा जमाना है? — अयं कीदृशः युगः अस्ति?
What type of period is this?
6. कोई यक्ष वहाँ रहता था। — कश्चिद् यक्षः तत्र न्यवसत्।
Some Yaksha lived there.
7. तुम किस नगर में रहते थे? — त्वं कस्मिंश्चित् नगरे न्यवसः?
In which city did you live?
8. जिस किसी पर विश्वास मत करो। — यस्मिन् कस्मिश्चिद् विश्वासं न कुरुत।
Do not rely upon the person, whosoever.
9. किस ने तुम्हें बुलाया है? — त्वं केन आहूतोऽसि?
Who has called you?
10. यह पुस्तक किसे दोगे? — इदं पुस्तकं कस्मै दास्यसि?
Whom would you give this book?

अनुवाद करो (Translate)

1. यह कैसा आडम्बर है?
What a show is this?
2. तुम कैसी बातें करती हो?
What kind of talk do you make?
3. वह कितना नीच है?
How mean is he?
4. क्या वह इतना गिर गया है?
Has he stooped so low?
5. क्या वह तुम पर विश्वास करेगा?
Will he rely upon you?
6. क्या हम उन्हें पहचान लेंगे?
Shall we recognise them?
7. क्या आज सूर्य बादलों में छिपा रहेगा?
Will the sun remain hidden in the clouds today?
8. तुम किसकी बात कर रहे थे?
Whom were you talking about?
9. यह कैसी सुन्दर जोड़ी है!
How beautiful this couple is!
10. जमाना कितना बदल गया है?
How much has the time changed?

अभ्यास 6

1. इन्द्र ने वृत्रासुर को मार दिया। — इन्द्रः वृत्रासुरम् अमारयत्।
Indra killed the demon Vrtrasur.

2. तुम इन हड्डियों को स्वीकार करो। त्वम् इमानि अस्थीनि स्वीकुरु।
You should accept these bones.
3. वह कभी यहाँ नहीं आयेगा। सः कदापि अत्र न आयास्यति।
He will never come here.
4. जो लोगों को सताते हैं वे मेरे शत्रु हैं। ये जनान् पीडयन्ति ते मम रिपवः।
Those who tease the people are my enemies.
5. इसे हम बाँधकर यहाँ लाते हैं। वयम् इमं बद्ध्वा अत्र आनयामः।
We bring here this man after binding.
6. ग्रामाधिकारी किसलिए नियुक्त किया गया था? ग्रामाधिकृतः किमर्थम् नियुक्त आसीत्?
What for had the village officer been appointed ?
7. समुद्र के किनारे की शीतल वायु सेवन करने योग्य है। समुद्रतीरे शीतलवायुः सेव्यः।
The cool breeze of the sea-beach is worth enjoying.
8. सज्जनों की संगति करनी चाहिये। सज्जनैः सह संगतिः करणीया।
We should accompany the noble persons.
9. मण्डप में नौका से पहुँचा जा सकता है। मण्डपः नौकया प्राप्यः।
We can reach Mandap by boat.
10. कन्याकुमारी भारत के दक्षिण में स्थित है। कन्याकुमारी भारतस्य दक्षिणे कोणे तिष्ठति।
Kanyakumari is located in the south of Bharata.

अनुवाद करो (Translate)

1. वह मुझ सोये हुए के बालों को काटता है।
He cuts my hair during sleep.
2. भूख से पीड़ित मुझे भोजन दो।
Give meals to me who is dying of hunger.
3. कुएँ में प्रवेश करके मेरे शत्रुओं को नष्ट करो।
Finish my enemies after entering into the well.
4. मैं तेरा क्या प्रिय करूँ?
What good may I do for you ?
5. शत्रु को शत्रु से मारना चाहिये।
Enemy should be killed through his enemy.

6. भक्ष्य तथा भक्षक में कैसी मित्रता?
What friendship can there between the eater and the object of eating.
7. मार्ग के दोनों और छायादार वृक्ष हैं?
There are shady trees on both sides of the road.
8. वह उस का परम मित्र हो गया।
He became his fast friend.
9. वह भूख से मर रहा है।
He is dying of hunger.
10. वह दूध लेकर आता है।
He is coming, carrying milk?

अभ्यास 7

1. तुम कैसी बात करते हो? — त्वं कथं वार्तयसि?
How do you talk?
2. क्या यह सब स्वप्न था? — किमिदं सर्वं स्वप्नम् आसीत्?
Was it all a dream?
3. तुम किसलिये यहाँ आये हो? — त्वं किमर्थम् अत्र आगतोऽसि?
What brings you here?
4. यदि तुम नहीं दोगी तो तुम दासी हो। — यदि त्वं न दास्यसि तदा त्वं दास्यसि (दासी+असि)।
If you do not give, then you are a maid servant.
5. तुम कैसी दासी हो? — त्वं कीदृशी दासी असि?
What kind of maid servant you are?
6. प्रजापति ने हरि को सब कुछ बता दिया। — प्रजापतिः हरये सर्वं न्यवेदयत्।
Prajapati told everything to Hari.
7. हरि ही हमें बचा सकते हैं। — हरिः एव अस्मान् रक्षितुं समर्थः।
Hari alone can save us.
8.
क्या तुम भी दिल्ली जाना चाहते हो? — किं त्वमपि इन्द्रप्रस्थं गन्तुम् इच्छसि?
Do you also want to go to Delhi?
9. क्या आप हम से नाराज हैं? — किं भवान् अस्मासु अप्रसन्नः अस्ति?
Are you unhappy with us?
10. भगवान् भी मनुष्य को अपना प्यार बाँटते हैं। — ईश्वरोऽपि मानवाय स्वस्नेहं वितरति।
God also distributes his love for men.

अनुवाद करो (Translate)

1. तुम किस के कहने से यहाँ आये हो?
Who has brought you here?

2. काँटे से काँटा निकाला जाता है।
Diamond cuts diamond.
3. चिन्ता से सब कुछ नष्ट हो जाता है।
Everything goes away due to worries.
4. धैर्य से सब काम सिद्ध हो जाते हैं।
All works are completed by forbearance.
5. तुम किस की सहायता से पुल बाँधोगे?
With whose help will you make the bridge?
6. उस का क्या नाम है?
What is his name?
7. क्या तुम फिर भी उसके पास जाओगे?
Will you again go to him?
8. उस को कभी अकल नहीं आयेगी।
He will never act wisely.
9. सूर्य का पूर्व दिशा से निकलना निश्चित है।
Rising of the sun in the east is certain.
10. इस ब्राह्मण के मनोरथों को पूरा करो।
Fulfil the wishes of this Brahman.

अभ्यास 8

1. सूर्य पूर्व दिशा में उदय होता है। सूर्यः पूर्वस्यां दिशि उदेति।
The sun rises in the east.
2. सूर्य पश्चिम दिशा में अस्त होता है। सूर्यः प्रतीच्याम् अस्तमेति।
The sun sets in the west.
3. कृपया शोर मत कीजिए। कृपया कोलाहलेन अलम्।
Please do not make a noise.
4. सदा सच बोलो। सदा सत्यं वद।
Always speak truth.
5. रामायण के लेखक कौन हैं? रामायणस्य लेखकः कोऽस्ति।
Who is the author of the Ramayana.
6. परिश्रम सफलता की कुंजी है। परिश्रमः साफल्यस्य कुञ्जी अस्ति।
Hard work is a key to success.
7. कृष्ण ने कंस को मथुरा में मारा था। कृष्णः कंसं मथुराया जघान।
Krishna had killed Kansa in Mathura.
8. तपस्वी वनों में रहते हैं। तपस्विनः वनेषु निवसन्ति।
The ascetics live in the forests.
9. रामायण की कथा सुन्दर है। रम्या रामायणी कथा।
The Ramayana story is charming.
10. काव्यों में नाटक सुन्दर होता है। काव्येषु नाटकं रम्यम्।
Drama is charming among the Kavyas.

अनुवाद करो (Translate)

1. तू ही यह काम कर।
   You alone would do this work.
2. शायद वह इस काम को करे।
   He might do this work.
3. एक कर्म करता है फल अनेक भोगते हैं।
   One does the work, many enjoy its fruit.
4. सुन्दरी शरीर के अंगों को सजाती है।
   The beautiful lady decorates the parts of her body.
5. वह काम करता दिखाई नहीं देता।
   He is not seen while doing work.
6. न जाने कोई काम करेगा या नहीं।
   God knows, someone will do the work or not.
7. व्याकरण शब्दों को खोल-खोल कर बता देता है।
   Grammar describes the words in detail.
8. प्रजातन्त्र में प्रजा ही राज्य करती है।
   In democracy, the people run the administration.
9. नीच बोलता जाता है, करता नहीं।
   The low speaks on, but does not act.
10. सज्जन बोलता नहीं, करता है।
    The noble does not speak, but acts.

अभ्यास 9

1. दिन के समय चन्द्रमा दिखाई नहीं देता। The moon is not seen during daytime.	दिवा चन्द्रः दृष्टिपथं नायाति।
2. गाँव के चारों और जंगल है। There is forest around the village.	ग्रामं परितः वनं विद्यते।
3. युद्ध में रावण को किस ने मारा था? Who had killed Ravana in the battle.	युद्धे रावणं कः अमारयत्?
4. मैंने निर्धन को एक गाय दान में दी है। I have donated a cow to the poor.	अहं निर्धनाय गामेकाम् दानेन अयच्छत्।
5. कृपया धीरे-धीरे चलिए। Please go slowly.	कृपया शनैः-शनैः चलितव्यम्।
6. वृक्ष पर कुछ पक्षी हैं। There are some birds on the tree.	वृक्षे केचन खगाः सन्ति।
7. बालक बन्दर से डरता है। The boy is afraid of the monkey.	बालः वानरात् बिभेति।
8. केवल पेट को कौन नहीं भर लेता? Who does not fill up the belly?	उदरं को न बिभर्ति केवलम्।

3. यद्यहं भारतस्य प्रधानमन्त्री स्याम्

भारतस्य संविधाने प्रधानमन्त्रिणः पदम् अतीव महत्त्वपूर्णं वर्तते। सः राष्ट्रस्य असिद्धानि कार्याणि साधयितुं प्रभवति। सः प्रमुखदलस्य नेता अस्ति। सः मन्त्रिमण्डलस्यं अध्यक्षः वर्तते। यदि अहं प्रधानमन्त्री स्याम् तदहं राष्ट्रम् उन्नतिपथं नेतुम् अहोरात्रं प्रयतेय।

शुद्धराष्ट्रवादस्य प्रतिष्ठाकरणम्

अस्माकं राष्ट्रे धर्मनिरपेक्षतायाः विकृतस्वरूपः वर्तते। अल्पसंख्यकानां सर्वत्र तुष्टिकरणं भवति। अहम् अल्पसंख्यकैः सह भेदभावं न करिष्यामि किन्तु अल्पसंख्यकवादस्य स्थाने शुद्धराष्ट्रवादं प्रतिष्ठितं कर्तुं यतिष्ये।

मानबिन्दुरक्षणम्

अस्माकं राष्ट्रस्य केचन मानबिन्दवः सन्ति यथा वेदसंगतिः संस्कृतभाषाप्रचारः, गोरक्षा च । तान् प्रति अधुना यावत् यादृशी उपेक्षा वर्तते, न तादृशी-कुत्रापि दृश्यते। यद्यहं प्रधानमंत्री स्याम् तदा वेदमन्दिराणां प्रतिप्रदेशं निर्माणं, निःशुल्क-संस्कृत-शिक्षणस्य व्यवस्थां, गोशालानां च सम्यक् प्रतिष्ठां, मद्यपाननिषेधञ्च विधातुं प्रामुख्येन चेष्टां कुर्याम्। अयोध्यास्थितस्य रामजन्मभूमिमन्दिरस्य पुनरुद्धारोऽपि मया कारयिष्यते।

जनसंख्यासमस्यायाः समाधानम्

अत्र महती जनसंख्या समस्यारूपेण विद्यते। तस्य समाधानार्थम् अहं लघूद्योगानां प्रसाराय यतेय, महोद्योगानाम् उपयोगं सुरक्षा-शास्त्रास्त्र-निर्माणाय कारयेयम्।

निर्वाचन पद्धतौ संशोधनम्

अस्माकं निर्वाचनपद्धतिः अपि दोषपूर्णा वर्तते तत्र संशोधनम् अपेक्षते । मया एतस्मिन् कार्ये वरीयता देया।

अस्माकं शिक्षापद्धतिः अतीव दोषपूर्णा वर्तते। अतोऽहं प्रथमम् एतामेव सन्मार्गम् आनेष्यामि।

4. क्रीडा-प्रतियोगिता

नवम्बरमासे प्रतिवर्ष विद्यालयस्य क्रीडा-दिवसः भवति। तदा विविधानां क्रीडाप्रतियोगितानाम् आयोजनं भवति। गतवर्षे मानितः क्रीडादिवसः अतीव स्मरणीयः आसीत्। तत्र छात्रैः अपूर्वेण उत्साहेन भागो गृहीतः। कबड्डी-प्रतियोगितायां तु सर्वेषां दर्शकानां मनांसि हृतानि। रंजन-धवन-मनोहरादीनां कलात्मकं प्रदर्शनम् अद्भुतम् आसीत्।

प्रधावनप्रतियोगिता

प्रधावन-प्रतियोगितासु त्रिसहस्रकिलोमीटर-प्रधावन-प्रतियोगिता अद्वितीया आसीत्। तत्र भीमसिंहः पूर्वस्थापितान् मानदण्डान् अपास्य नवं मानदण्डन् अस्थापयत्। मल्लयुद्धे विश्वामित्रः निजलाघवान् दर्शयित्वा सर्वेषां प्रशंसापात्रम् अतिष्ठत्।

शाटपुट-भारोत्तोलन-प्रतियोगिता

शाटपुट-प्रतियोगिषु रमेशः लौहगोलम् अतिदूरं प्रक्षिप्य नवीन क्षेपमानम् अस्थापयत्। भारोत्तोलन-प्रतियोगितायां न केनापि उत्साहः प्रदर्शितः, किन्तु मन्दचालप्रतियोगितायां छात्रैः अपूर्वस्य धैर्यस्य प्रदर्शनं कृतम्। द्विचक्रिका-प्रतियोगितायां तु एकः छात्रः मार्गे एव पतितः मुर्च्छितश्च।

कन्यानां योगदानम्

कासुचित् प्रतियोगितासु कन्याभिः अपि भागो गृहीतः फलप्राप्ति-प्रतियोगिनीषु चञ्चला अतीव चञ्चला जाता। तत्र कन्यकाः चलत्सूत्र-फलानि दन्तैः पुनः पुनः ग्रहीतुं चेष्टमानाः अतर्कितं दृश्यम् उपास्थापयन्। मृद्भाण्ड-त्रयं गृहीत्वा धावन्ती लता पूर्वं स्थापितं निजं मानम् अतिलघ्य सर्वेषां प्रशंसा-भाजनं जाता। संगीतमयाऽऽसन-प्रतियोगितायाम् अध्यापकैः अपि भागो गृहीतः। तैः रज्जु-कर्षण-प्रतियोगितायाम् अपि अपूर्वः उत्साहः प्रदर्शितः। तत्र संस्कताध्यापकः प्रथम् स्थानं प्राप्नोत्।

पारितोषिक-वितरणम्

प्रतियोगिता-परिसमाप्तौ अध्यक्षमहाभागैः पारितोषिकानि प्रदत्तानि। इत्थम् अयं प्रतियोगिता-समारोहः सर्वेषां हर्षातिरेकम् अजनयत्।

5. मम प्रियः कविः

(वाल्मीकिः)

[*C.B.S.E. (O) 1992*]

मम प्रियः कवि वाल्मीकिः अस्ति। सः आदिकविः आसीत्। तस्य नाम रत्नाकरः आसीत्। एकदा तपश्चर्यां कुर्वतः तस्य उपरि एकं वल्मीकं (मृद्-आवरणम्) पुत्तिकाभिः कृतम्। तत्पश्चात् लोके अयं वाल्मीकिः इति विश्रुतः अभवत्।

आदिकविः

एकदा तमसा-तीरे भ्रमता अनेन व्याधेन विध्यमानम् एकं क्रौञ्चं दृष्टम्। तत् करुणं दृश्यं दृष्ट्वा अस्य मुखात् देववाण्याम् अयं श्लोकः अनुष्टुभ् छन्दसा आविर्भूतः—

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।

तत्पश्चात् अयं ब्रह्मणो वचनाद् अस्मिन् छन्दसि रामचरितम् अवर्णयत्। तस्य कृतिः लोके 'रामायणम् आदिकाव्यम इति प्रसिद्धिम् लब्धवती।'

विश्वसाहित्ये रामायणस्य स्थानम्

वाल्मीकि-विरचितं रामायणम् विश्वसाहित्ये अपूर्वं पदम् अलङ्करोति। एतादृशं प्रियं महाकाव्यं जगति अन्यत्र न उपलभ्यते। कश्चित्कविः वाल्मीकिं प्रशसन् इदमाह—

कवीन्दुं नौमि वाल्मीकिं यस्य रामायणी कथाम्।
चन्द्रिकामिव चिन्वन्ति चकोरा इव साधवः॥

वाल्मीकिं वन्दमानः कश्चिद् अन्यः कविः कथयति—

कूजन्तं राम रामेति मधुरं मधुराक्षरम्।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्॥

रामायणं नैतिकादर्शानाम् आकरः अस्ति। अस्य भाषा सरला प्राञ्जला च। इदं भारतीयानां मानबिन्दुः अस्ति। वाल्मीकिः तस्य काव्यं च मानवहृदयेषु प्रतिष्ठेते।

सीतायाः संरक्षणम्

वाल्मीकिः निजतपोवने रामेण निर्वासितायै सीतायै संरक्षणम् अयच्छत्। सः तत्रैव उत्पन्नं लवकुशनाम्ना प्रसिद्धं सीतायाः दारकद्वयम् अरक्षत्, तं च युद्धविद्यां रामायणपाठं च अशिक्षयत्।

6. मम प्रियं पुस्तकम्
(रम्या रामायणी कथा)

मम प्रियं पुस्तकम् रामायण् अस्ति। अस्मिन् ग्रन्थे मर्यादापुरुषोत्तमस्य श्रीरामस्य जीवनस्य वृत्तं वर्तते। अस्य लेखकः महर्षिः वाल्मीकिः आसीत्। सः आदिकविः आसीत्, अतः तस्य रचना "आदिकाव्यम्" इति कृत्वा विद्वांसः स्मरन्ति। एतत् काव्यम् अनुष्टुप्-छन्दसि निबद्धम्। अत्र श्लोकानां चतुर्विंशतिसहस्रं वर्तते, तेन रामायणं चतुर्विंशति-साहस्री संहिता इति नाम्ना अपि विद्वद्भिः स्मर्यते। इदं कविना नारदमुनेः प्रेरणया ब्रह्मणः वचनेन च रचितम्।

रा यणस्य काण्डव्यवस्था

रामायणे 'बालकाण्ड-अयोध्याकाण्ड-अरण्यकाण्ड-किष्किन्धाकाण्ड-सुन्दरकाण्ड-युद्धकाण्ड-उत्तरकाण्ड' इति सप्त काण्डानि वर्तन्ते। केचन विद्वांसः बालकाण्डं उत्तरकाण्डं च अवान्तरकालिकं प्रक्षेपं मन्यन्ते। तत्र श्रीरामस्य प्रमुखतः परमेश्वरावताररूपेण वर्णनं वर्तते। प्रक्षिप्तकाण्ड-विषयिकी धारणा न सत्यं प्रतीयते, तथापि बालकाण्ड-उत्तरकाण्डयोः मध्ये केचन श्लोकाः प्रक्षिप्ताः सन्ति इत्यवधारणे न कश्चित् सन्देहोऽस्ति।

रामायणे निरूपिताः जीवनादर्शाः

रामायणे रामराज्ये समाजव्यवस्थायाः विशदं वर्णनम् उपलभ्यते। श्रीरामलक्ष्मणादीनां भ्रातृस्नेहः सत्यम् उदाहर्यः एव। सीता आदर्श-नारीत्वस्य निदर्शनम् अस्ति। प्रजायाः अनुरञ्जनार्थं स्वभार्यामपि परित्यजन् रामः महान्तम् आदर्शम् स्थापितवान्। रामायणं वस्तुतः सरस-संस्कृतेन रचितम् आदर्शानां दर्पणम् इव भासते। इदं सर्वस्य अपि सततं प्रेरणास्रोतः। एभिः अन्यैश्चापि अनेकैः कारणैः रामायणं मम अति प्रियं पुस्तकम् अस्ति। सत्यम् उक्तम् कविना—

यावत् स्थास्यन्ति गिरयः सरितश्च महीतले।
तावद् रामायणी कथा लोकेषु प्रचरिष्यति॥

7. मम प्रियं पुस्तकम्

अथवा

श्रीमद्-भगवद्गीता

धर्मक्षेत्रे कुरुक्षेत्रे समवेतानां युयुत्सुकानां कौरवाणां पाण्डवानां च मध्ये भगवता कृष्णोनअर्जुनम् अभिलक्ष्य गीता वाणी श्रीमद्भगवद्गीता इति नाम्ना वर्तते। एषा अष्टादश पर्वसु सहस्रश्लोकेषु महर्षिवेदव्यासेन निबद्धा वर्तते। इयं रचना महाभारतस्य मध्यभागे दीपस्तम्भ इव स्थिता प्रतीयते। गीतायाः महिम्नः विषये स्फुटम् अभिव्यक्तम् अस्मिन् श्लोके—

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुख-पद्माद्विनिः सृता॥

गीतायाः कर्मयोगः

गीताशास्त्रं कर्तव्याद् विमुखस्य मानवस्य कर्तव्ये कर्मणि प्रयोजकम् वर्तते। अत एव इदं कर्मयोगरहस्यम् इति स्मर्यते। स्वबान्धवान् सम्मुखम् दृष्ट्वा अर्जुनः युद्धाद् विमुखो जात। सः क्लैव्यं कश्मलम् च आप्तवान्। अर्जुनस्य विषादः जीवन-संग्रामात् निवर्तकस्य कस्यापि जनस्य विषादः अस्ति। सः विषादः गीतायाः उपदेशेन भगवत्कृपया च नष्टो भवति। गीतायाः अन्ते अर्जुनः एव स्वीकरोति—

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव॥

भगवता कृष्णेन गीतासारतया इदमेव उक्तम्—

असक्तः कुरु कर्माणि संगं त्यक्त्वा धनञ्जय।

तथा च—

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भू मा ते सङ्गोऽस्त्वकर्मणि॥

सर्वोपनिषदां सारः

अनासक्तकर्मयोगस्य अयं सिद्धान्तः अप्रतिमः खलु। अत्र एव सर्वोपनिषदां सारः विद्यते। गीता गोभूतानाम् उपनिषदां दुग्धम्ः—

सर्वा उपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥

गीतायां सांख्ययोग-बुद्धियोग-ध्यानयोगःभक्तियोगादीनां ज्ञानं सरलसंस्कृतेन उपलभ्यते।

विश्वभाषासु रूपान्तरम्

संसारस्य सर्वासु भाषासु गीतायाः रूपान्तरम् उपलभ्यते। विश्वविदितोऽयं ग्रन्थः भारतीयमनीषिणां प्रकाशस्तम्भः वर्तते। किम्बहुना, यावत्कालं नरः तापत्रयग्रस्तो भविष्यति, तावत्कालं सः श्रीमद्भगवद्गीताम् आश्रयिष्यति।

8. वसन्तपञ्चमी/होली महोत्सवः

अथवा

वसन्तोत्सवः

अस्माकं देशे वसन्तोत्सवः सोत्साहं मान्यते। वसन्तकाले शीतस्य दुष्प्रभावः नश्यति। अतएव कथ्यते—वसन्ते सम्प्राप्ते किल शीतं ह्यपगतम्।

वसन्तपञ्चमी-महोत्सवः

वसन्तोत्सवः 'वसन्तपञ्चमी' इति नाम्ना अपि प्रसिद्धो वर्तते। माघमासस्य शुक्लपक्षस्य पञ्चम्यां तिथौ अयम् उत्सवः भवति। अस्मिन् दिने क्षेत्रेषु सर्वत्र पीतम् सर्षपं विकसितं दृश्यते। जनाः पीतवस्त्राणि गृहीत्वा इतस्ततः भ्रमन्ति। विद्यालयेषु छात्राणां अध्ययनं तु न भवति, परम् ते सर्वे समवेताः नगराद् ग्रामाद् वा बहिर् गच्छन्ति। तत्र एकस्मिन् क्रीडाक्षेत्रे विविधासु क्रीडास्पर्धासु रममाणाः भवन्ति। मधुराणि गीतानि गीयन्ते। वीररसपूर्णाः देशभक्तिभावभरिताः देशहिताय बलिदानस्य प्रेरणां सञ्चारयन्त्यः कविताः अपि पठ्यन्ते। वासन्तिक-वर्ण-शोभितम् 'हलुआ' इति मिष्टान्नम् सर्वैः भुज्यते।

होली-पर्वणः महत्त्वम्

एकः अपरः उत्सवः "होलिका दहनपर्व" अथवा 'होली' नाम्ना प्रसिद्धः अस्ति। अयमपि 'वसन्तोत्सवः' इति स्वीक्रियते। अस्मिन् दिने होलिकानाम्ना प्रसिद्धा काचित् राक्षसी प्रभुभक्तं प्रह्लादम् दग्धुकामा सती स्वयमेव दग्धा जाता। तस्याः दहनम् अभिनयन्तः जनाः अग्निं परितः तिष्ठन्ति। अस्मिन् अवसरे गृहेषु अग्निहोत्रम् अपि भवति। अस्मिन् दिने नवधान्यस्य अपि गृहे आगमनम् भवति।

होलीपर्वणः स्वरूपम्

'होली' उत्सवस्य संलग्नः 'होली' अथवा 'फाग' नाम्ना प्रसिद्धः उत्सवः द्वितीये दिने मान्यते। तदा जनाः शुष्कम् 'गुलाल' इति रागम् आदाय अन्योन्यमुखानि लिम्पन्ति। एतानि चित्रितानि मुखानि अतीव हर्षोत्पादकानि सन्ति। केचन जनाः 'पिचकारी' सहयोगेन द्रवं रागम् अन्योन्यस्य उपरि क्षिपन्ति। वसन्तोत्सवे लोकः नृत्यति, गायति, उच्छलति इति विविधाः विनोदपूर्णाः चेष्टाः करोति।

9. दीपावली

दीपावलीनामकं पर्व भारते अतीव महत्त्वम् वहति। श्रूयते यत् अस्मिन् दिने त्रेतायुगे मर्यादापुरुषोत्तमः श्रीरामचन्द्रः पितुः आज्ञां परिपालयन्, चतुर्दशवर्षपर्यन्तं वने उषित्वा राक्षसराजम् रावणं हत्वा तस्य बन्धनात् स्वपत्नीं सीतां च विमोच्य, सीतया लक्ष्मणेन च सहितः अयोध्यां नगरीं निवृत्तः आसीत्। तदा च तस्य स्वागतम् लोकेन रात्रौ दीपमालां कृत्वा कृतम्। ततः प्रभृति सर्वैः भारतीयैः अस्मिन् एव दिने प्रतिवर्षं स्वगृहेषु दीपमाला क्रियते।

लक्ष्मीपूजनम्

दीपावलीमहोत्सवे रात्रौ श्रीमहालक्ष्मीपूजनं क्रियते। स्थाने-स्थाने वैदिकमन्त्रैः हवनयज्ञादिकम् अपि अनुष्ठीयते। बहवो वणिजः अस्माद् दिनाद् "बही-खाता" आरम्भं कुर्वन्ति। कार्तिकमासस्य अमावस्यायां दीपावलीमहोत्सवम् भवति। अस्मिन् दिने गृहाणां विशेषतः शुद्धिः सुधाधवलिता च क्रियते। गृहम् नववधूरिव भासते। यत्र-यत्र शोभा, तत्र-तत्र महालक्ष्मीदेव्याः आगमनम् भवति इति मन्यते।

दीप-प्रकाशः

तैलस्य लघुदीपाः पंक्तिशः प्रकाश्यन्ते। अधुना मोम-वर्तिकानाम् पंक्तिभिः दीपपङ्क्तीनां स्थानं गृह्यते। विविधरागाः विद्युद्-बलभाः विविधान् रागान्

व्यञ्जयन्ति। बालक-बालिकाभिः विविधारूपाः स्फोटाः विस्फोट्यन्ते। दीपानां प्रकाशेन अमावस्यायाः तिमिरम् आच्छाद्यते। गृहलतासु विटपेषु चापि विविधरागदीपाः विलसन्ति। आबालवृद्धाः मिष्टान्नम् मधुरं स्वदन्ते। प्रतिवेशिगृहेषु मिष्टान्न-वण्टनार्थं नवीनाः वध्वः सातिशयं श्रृंङ्गारं कृत्वा गच्छन्ति। स्वमित्र-बान्धवेभ्यः मिष्टान्नम् प्रेष्यते। सर्वे परस्परं मिलित्वा सर्वबन्धूनां मङ्गलकामनां कुर्वन्ति।

10. स्वातन्त्र्यदिवसोत्सवः

महत्त्वम्

प्रतिवर्षं अगस्तमासस्य पञ्चदशतिथौ सम्पूर्णे भारतवर्षे स्वातन्त्र्यदिवसोत्सवः मान्यते। अस्मिन् दिने अस्माकम् राष्ट्रं परकीयाणां बन्धवात् विमुक्तम् आसीत्। 1947 तमे वर्षे अस्मिन् दिने ब्रिटिशशासकैः सुबद्धा भारतमाता श्रृङ्खलां परित्यज्य बन्धनविहीना जाता। दिल्लीनगरे 'लालकिला' दुर्गे प्रधानमन्त्रिमहोदयैः राष्ट्रीय-ध्वजारोहणं सञ्जातम्। तस्मादेव दिनादारम्य महोत्सवोऽयं प्रतिनगरम् प्रतिग्रामम् महता समारोहेण मान्यते भारतवासिभिः।

राष्ट्रीयध्वजारोहणम्

स्वतन्त्रतादिवसे प्रातःकाले एवं नगरे-नगरे ग्रामे-ग्रामे राष्ट्रीयध्वजारोहणम् क्रियते। तदनन्तरम् नेतृणां भाषणानि भवन्ति। जनाः स्वगृहेषु कार्यालयेषु च राष्ट्रध्वजान् आरोहयन्ति राष्ट्रोन्नत्यै च शपथं कुर्वन्ति, राष्ट्रभक्तानां वीराणां स्मरणं क्रियते। दूरवीक्षणे दिल्लीनगरस्य स्वतन्त्रतादिवसस्य राष्ट्रीयः कार्यक्रमः दर्श्यते। तत्र प्रधानमन्त्रिणः सन्देशोऽपि श्रुतिगोचरो भवति। तत्र विशालो जनसमूहः एकत्रितो भवति। लालकिलादुर्गस्य उपरि निर्मिते मंचे विशिष्टाः अतिथयः उपविशन्ति। सर्वं दृश्यम् अतिरमणीयम् दर्शनीयं च भवति।

स्वातन्त्र्य-रक्षणम्

नात्र कश्चिदपि सन्देहः यत् अस्माकं पूर्वजाः स्वातन्त्र्यलाभाय स्वरक्तस्य प्रवाहं कर्तुम् सदा तत्पराः आसन्। अस्माकं कुलवध्वः सतीत्वरक्षायै प्रतिक्षणं समुद्यता आसन्। अस्माभिः अपि अधुना स्वातन्त्र्यस्य रक्षणाय सततं जागरूकैः स्थित्वा राष्ट्रसेवा विधेया, स्वार्थः सीमितः करणीयः, परमार्थश्च सम्पादनीयः।

देशरक्षायाः संकल्पः

स्वातन्त्र्यदिवसोत्सवः न केवलम् अस्मान् स्वाधीनतायाः महत्त्वमेव स्मारयति प्रत्युत देशरक्षायै अपि आमन्त्रयति। वस्तुतो महता कष्टेन प्राप्तायाः स्वतन्त्रतायाः संरक्षणाय अस्माभिः सदैव कृतसङ्कल्पैः स्थातव्यम्।

11. गणतन्त्रदिवसः

महत्त्वम्

भारतम् अस्माकं पूर्वजानां महता प्रयत्नेन 1947-तमे ईसवीयाब्दे अगस्तमासस्य पंचदशमे दिनाङ्के स्वतन्त्रम् अभूत्। तदनन्तरं डा. राजेन्द्रप्रसादमहोदयस्य सभापतित्वे संविधानसभा भारतस्य संविधानं निर्मितवती। संविधानस्य आरम्भदिवसः गणतन्त्रदिवसः इत्युच्यते। तस्माद् दिनाद् भारतं पूर्णरूपेण स्वतन्त्रं जातम्। पंचाशदुत्तरैकोनविंशतिशततमे (1950) ईसवीयाब्दे जनवरी मासस्य षड्विंशतितमे

दिनाङ्के (26 जनवरी) स्वतन्त्रभारतस्य संविधानम् आरब्धम् अभवत्। डा. राजेन्द्रप्रसाद एव स्वतन्त्र-भारतस्य प्रथमो राष्ट्रपति निर्वाचितः अभवत्।

संविधानस्य आरम्भदिवसः

जनवरीमासस्य षड्विंशतितमे दिवसे भारतस्य राष्ट्रियोत्सवः प्रतिवर्षं सम्पद्यते अस्य दिवसस्य इव अस्याः तिथेरपि स्वकीयं महत्त्वं वर्त्तते। स्वतन्त्रतायाः आन्दोलनकाले 1929 तमे ईसवीयाब्दे लवपुरे रावीतटे जवाहरलालनेहरूमहोदयस्य सभापतित्वे कांग्रेसस्य अधिवेशनम् अभवत्। तदा जनवरीमासस्य 26 तमे दिनाङ्के पूर्णस्वतन्त्रतायाः प्राप्तिरेव भारतस्य लक्ष्यं घोषितम् आसीत्। अतः स एव दिवसः संविधानस्य अपि आरम्भदिवसः इति स्वीकृतो नेतृभिः।

राजधान्यां समारोहः

दिल्लीनगरे अयं गणतन्त्रदिवसः विशेषमहोत्सवरूपेण मान्यते। भारतस्य राजधान्याम् अयम् उत्सवः 'इण्डिया गेट' इत्याख्ये स्थाने भवति। अस्य आयोजनं भारतीय नयेन क्रियते। राष्ट्रपतिमहोदयो राजकीयं रथम् आरुह्य विशालजनसमूहस्य मध्ये समायाति राष्ट्रध्वजं च उत्तोलयति। स्थल-नभ-जल-सैनिकाः सैनिकरीत्या तं नमस्कुर्वन्ति। ततः एका शोभायात्रा चलति लालकिला-दुर्गं प्राप्नोति। अस्यां शोभायात्रायां सशस्त्र-सैनिकाः, सैनिकवाद्यानि, टैंक-तोपादि-युद्धास्त्राणि, प्रान्तीयवेषभूषादिसुभूषिताः स्वरूपरचनाः, शारीरिक-प्रदर्शनं कुर्वन्तः, विविधानां विद्यालयानां छात्राः नर्तकाः, गायकादयश्च, सम्मिलन्ति।

विद्युद्-दीप-प्रकाशः

रात्रौ राष्ट्रपतिभवने सचिवालये सार्वजनिकस्थानेषु च विद्युद्दीपानां कान्तः प्रकाशः भवति यो दर्शकानां मनासि हरति। यत्र तत्र अग्निक्रीडायाः प्रदर्शनम् अपि भवति। प्रदेशेषु अपि प्रतिनगरं प्रदर्शनपूर्वकं दिवसोऽयं मान्यते। इमं महोत्सवं द्रष्टु दूरतो जनाः समागच्छन्ति हृदयोल्लासं चानुभवन्ति।

12. मम विद्यालयः

मम विद्यालयः भारतस्य राजधान्यां वर्तते। अयं मम गृहस्य समीपे वर्तते। अत्र सुदूरात् अपि केचित् बालकाः आगच्छन्ति। अस्य प्रधानाचार्यः सुयोग्य अनुशासनप्रियः चास्ति। अन्येऽपि अध्यापकाः स्व-स्व-विषये निष्णाताः। ते छात्रान् स्नेहेन पाठयन्ति।

अध्यापनव्यवस्था

मम विद्यालयस्य परिसरः शान्तिपूर्णः प्रकृत्या मनोहरः चास्ति। अयं विद्यालयः नितरां प्रसिद्धतमः। अस्य परीक्षाफलं प्रशंसनीयं भवति। अत्राध्ययने वयं गौरवम् अनुभवामः।

क्रीडा-व्यवस्था

मम विद्यालये छात्राणां क्रीडार्थम् एकम् अतिविशालं क्रीडाक्षेत्रम् अपि विद्यते। वयं प्रतिदिनं होरापर्यन्तं अत्र क्रीडामः। अत्र समये-समये क्रीडाप्रतियोगिताः अपि भवन्ति। विद्यालये रमणीयम् एकम् उद्यानं विद्यते यत्र वयं प्रातः सायं भ्रमणाय गच्छामः।

तडागः

विद्यालयस्य समीपे एकः तड़ागः अपि वर्तते। प्रतिदिनं जलविहाराय वयं तत्र गच्छामः। चिरं स्नानं कृत्वा आनन्दं चानुभवामः।

विज्ञानप्रयोगशाला

विद्यालये एका महती विज्ञानप्रयोगशाला अपि अस्ति यत्र प्रयोगेण छात्राः विज्ञानसिद्धान्तान् अवगच्छन्ति।

पुस्तकालयः

विद्यालय एकः पुस्तकालयोऽपि विद्यते यत्र छात्राः पठितुं पुस्तकानि समाचार-पत्राणि च लभन्ते। अस्माकं विद्यालयस्य समीपे जलपानगृहस्य अपि व्यवस्था विद्यते यत्र गत्वा छात्राः स्वादूनि वस्तूनि खादन्ति, पेयानि च पिबन्ति।

सदाचार-शिक्षा-व्यवस्था

अस्माकं विद्यालये द्विसहस्रं छात्राः पठन्ति। जनाः निजबालकान् तत्र अहमहमिकया प्रेषयन्ति। अत्र सुपठनस्य यथा प्रबन्धो वर्तते, यथा च सदाचरणशिक्षायाः व्यवस्था विद्यते, न तथा अन्यत्र। अत्र छात्राः विशेषयोग्यतां लब्ध्वा उत्तीर्णा भवन्ति। बहवः छात्राः छात्रवृत्तिं लभन्ते, प्रतियोगि-परीक्षासु प्रवेशं चापि प्राप्नुवन्ति।

छात्रसभा

विद्यालये एका छात्रसभा अपि वर्तते। तस्याः सम्पूर्ण सञ्चालनं छात्रैः एव क्रियते। नैतिकं सांस्कृतिकं च विषयम् आदाय विविधाः मनोरञ्जकाः कार्यक्रमाः अत्र प्रतिसप्ताहं प्रस्तूयन्ते।

संस्कार-व्यवस्था

अस्माकं विद्यालस्य आरम्भकाले वेदमन्त्रैः प्रार्थना क्रियते। वयं निजविद्यालयविषये साभिमानाः तिष्ठामः।

13. श्रीमती इन्दरा गान्धी

जीवन-चर्या

आसीत् श्रीमती इन्दिरा गान्धी भारतस्य तृतीयः प्रधानमन्त्री । सा स्वतन्त्र भारतस्य प्रथम-प्रधानमन्त्रिणः श्री जवाहरलालनेहरूमहोदयस्य दुहिता आसीत्। तस्याः मातुः नाम कमला आसीत्।

शिक्षा

सा स्विट्जरलैण्डदेशे इंग्लैंडदेशस्य चाम्सफोर्डनगरे शिक्षामलभत। भारतवर्षे शान्तिनिकेतनमध्ये 'विश्वभारती' इत्यादिषु केन्द्रेषु चापि तस्याः शिक्षा-दीक्षा अभवत्।

विवाहः, सन्ततिश्च

अस्याः विवाहः 1942 तमे इसवीयवर्षे श्रीफिरोजगान्धी इति ख्यातेन योग्येन लेखकेन सह अभूत्। ततः अस्याः द्वौ पुत्रौ राजीवसंजयनामानौ जातौ।

स्वातन्त्र्ययुद्धे भूमिका

भारतस्य स्वातन्त्र्ययुद्धे इन्दिरायाः भूमिका उल्लेखनीया वर्तते। विवाहानन्तरं 'मुञ्च भारतम्' इत्यान्दोलने द्वावपि दम्पती कारागृहे अगच्छताम्। 1958-तमे ईसवीयाब्दे तस्याः भर्तुः मृत्युरभवत् सा च विधवा सञ्जाता। तदनन्तरं श्रीमती

इन्दिरागान्धी स्वपित्रा सह एवं राजनीतिकार्येषु भाग गृह्णाति स्म। सा श्रीलालबहादुरशास्त्रिणः केन्द्रीयमन्त्रिमण्डले 1964-तमे वर्षे सूचनाप्रसारणविभागस्य मन्त्रित्वं लब्धवती।

प्रधानमन्त्रित्वम्

श्रीशास्त्रिणं निधनात् ऊर्ध्व 1964-तमे वर्षे श्रीमती गान्धी प्रधानमन्त्रिपदत्वं प्राप्तवती। प्रथमावसरे प्रधानमन्त्रिपदं लब्ध्वा सा 'दारिद्रय नाशय' इति घोषम् अघोषयत्। 1971-तमे तस्याः आदेशेन भारतीयसैनिकाः पाकिस्तानं पराजित्य बंगदेशं स्वतन्त्रमकारयन्।

महत्त्वपूर्णानि कार्याणि

प्रधानमन्त्रिणा अन्यान्यपि महत्त्वपूर्णानि कार्याणि कृतानि । एतेषु भारतीयनृपतीनां प्रीवीपर्सस्य समाप्तिः, बैंकानां राष्ट्रीयकरणं बङ्गशरणार्थिनां पुनरावासश्च उल्लेखनीयाः सन्ति।

आपातस्थितिः

1975-तमे वर्षे श्रीमत्या इन्दिरादेव्या विंशतिसूत्रीयः आर्थिकः कार्यक्रमः उद्घोषितः। ततश्च आपातकालिकस्थितिः घोषिता। तदा बहुसंख्यकाः जनाः विरोधिनः राष्ट्रद्रोहिणः इति मत्वा कारासु क्षिप्ताः। 1977-तमे वर्षे निर्वाचनेषु इन्दिरागान्धी सदलं पराजिता बभूव। तस्याः सौभाग्येन च सा जनतादलस्य आन्तरिककलहकारणात् 1980-तमे वर्षे पुनः प्रधानमन्त्रिपदं प्राप्तवती। 1984 तमे वर्षे सा दिवंगता जाता।

भारतीयराजनीतौ स्थानम्

सिद्धान्तरूपेण समाजवादं सफलं कर्तुं कृतसङ्कल्पा आसीत् । सा दीर्घकालं यावत् भारतीयराजनीत्याः गगनं तारकितम् अकरोत्।

14. भारतीया संस्कृतिः

संस्कृतेः स्वरूपम्

का नाम संस्कृतिः ? चेतसः संस्करणं संस्कृतिः इति अभिधीयते। सा नाम संस्कृतिः या मनसः मलं व्यपनयति, चेतसः चाञ्चल्यं दूरीकरोति, आत्मनश्च अज्ञानावरणम् अपसारयति। एषा लोकस्य राष्ट्रस्य संसृतेश्च उपकरोति। अस्मिन् विश्वे सा एव संस्कृतिः उपादेया वर्तते यया सर्वेषां स्वान्तेषु विश्वहितं विश्वबन्धुत्वं च आदर्शत्वेन उररीक्रियते।

भारतीयसंस्कृतेः स्वरूपम्

भारतीयसंस्कृतेः स्वरूपम् अत्र प्रस्तूयते। यथा (1) धर्मप्राधान्यम्—मानवेषु धर्मप्राधान्यमेव तान् पशुभ्यः व्यवच्छेदयति। (2) आध्यात्मिकी भावना—एतत् जीवनम् न केवलं भोगार्थम् एव विद्यते अपितु एतत् आत्मोन्नतेः प्रमुखं साधनं वर्तते। आध्यात्मिकी भावना सर्वेषु जीवेषु एकत्वम् अनुभवति। (3) पारलौकिकी भावना—इदं जगत् विनश्वरं वर्तते। एका कीर्तिः एव अविनाशिनी अस्ति। अतः विषयसखानि अपहाय कर्तव्यमेव प्रमुखं मन्तव्यम्।

आधारभूताः गुणाः, सिद्धान्तानिच

सदाचरपालनं, वर्णाश्रमव्यवस्था, कर्मवादः, पुनर्जन्मवादः, मोक्षावाप्तिः, श्रुतीनां

प्रामाण्यम्, यज्ञस्य महत्त्वं, सत्यपरिपालनम्, अंहिसापरिपालनम्, इत्यादयः भारतीय-संस्कृते आधारभूताः गुणाः सन्ति।

भारतीया संस्कृतिः इदं पुष्णाति यत् परमेश्वरः सर्वव्यापकः, अप्रतिमः सर्वशक्तिमान् अस्ति। सः एकः एव अद्वितीयः वर्तते। सः एव स्तोतव्यः, मन्तव्यः, ध्यातव्यश्च।

भारतीयसंस्कृतिः कर्मसिद्धान्तं प्रतिपादयति। जीवाः कर्मवाशात् विविधाः योनीः लभन्ते। मनुष्ययोनिं लब्ध्वा यदि कश्चित् जीवः धर्मार्थिकामनां सामञ्जस्यं स्थापयित्वा जीवं निर्वहति तदा सः पुनरागमनचक्रात् विमुक्तो भूत्वा मोक्षं लभते।

विश्वसंस्कृतिषु प्राचीनतमा

विश्वस्य सर्वासु अपि संस्कृतिषु भारतीया संस्कृतिः प्राचीनतमा वर्तते। समन्वयात्मकस्वभावात् सहिष्णुताप्रकर्षत्वात् च अनन्तान् भीषणतमान् प्रहारान् सोढ्वा अपि एषा जीवति। भारतीया संस्कृतिः सर्वेषाम् अपि देशानां जातीनां च कल्याणं कर्तुं सक्षमाऽस्ति।

15. ग्राम्यजीवनम्

महत्त्वम्

भारते नगराणाम् अपेक्षया ग्रामाणां संख्या अधिका वर्तते। तस्मात् ग्रामजीवनम् अत्र प्रमुखतां वहति। अस्मिन् देशे ग्राम्यजीवनम् नागरजीवनात् पर्याप्तं भिन्नम् अस्ति। ग्रामोद्धारस्य कृते महान् प्रयासः क्रियते।

प्रमुखो व्यवसायः

ग्राम्यजीवने कृषिः एवं प्रमुखो व्यवसायः। ग्रामेण कुषकाणां समीपं जीवननिर्वाहात् अधिका भूमिः न वर्तते। ते अतिकठिनतया निर्वाहं कुर्वन्ति। तेषां समीपं मृत्-निर्मित-कोष्ठागारा एव भवन्ति। धनाभावात् ते सुबद्धगृहनिर्माणाय न प्रभवन्ति। तेषां समीपं एका लघुशाटिका एव वर्तते।

ग्राम्यजीवनस्य समस्याः

श्रमिकवर्गस्तु अत्यर्थ दारिद्रियं गतः तिष्ठति। सः दिने द्विकृत्वः न उदरपूरं भुङ्क्ते। ईदृशः ग्रामीणजनः अशिक्षितः, रोगबहुलः यथाकथञ्चित् जीवनयात्रां करोति। दारिद्रयोपहतः सः धूम्रपान-मद्यपानादिदुर्गुणैः संवीतः भवति।

दैनिकावश्यकतानां पूर्तिः

ग्रामीणाः दैनिकावश्यकतानां पूर्तिं तु ग्रामादेव कुर्वन्ति। चणकान्, गोधूमान्, तण्डुलान्, शर्करां, दलान्, शाकान् वस्त्राणि च ग्रामादेव लभन्ते। कर्गल-पुस्तकादीनि तु समीपस्थं नगरम् गत्वा एव क्रीणन्ति। उत्पादितम् अधिकम् अन्नं विक्रेतुं समीपस्थां मण्डी नयन्ति। यदि ग्रामे विद्यालयो नास्ति तदा ग्रामवासिनः स्वबालान् पाठनाय नगरेषु प्रेषयन्ति। चित्रपटादिदर्शनार्थम् अपि ग्रामीणाः नगरं गच्छन्ति।

सद्गुणसम्पन्नं जीवनम्

ग्राम्यजीवने धार्मिककृत्यानां महत्त्वं अधिकं वर्तते। ग्रामीणाः प्रायेण भाग्यं परम् मन्यमानाः सन्तोषेण कालं यापयन्ति। प्रायेण ते सात्त्विकवृत्तयः सन्ति। अधुना सुबद्धमार्गप्रसारात्, विद्युत्प्रयोगात्, शिक्षाप्रचारात् च ग्रामवासिनाम् अपि बहुविधंसमृद्धिः न अतिदूरा तिष्ठति।

16. मम प्रियः शिक्षकः

डाक्टरोपाधिभूषितः गुरुः आनन्दस्वरूपः मम प्रियः शिक्षकः अस्ति। सः केवलं इतः पूर्व दश-मासेभ्यः अस्माकं विद्यायेन सह सम्बद्धः जातः। ततः पूर्वम् अपि अनेके शिक्षकाः तत्र आसन् परं यथा गुरुम् आनन्दस्वरूपं मन्येऽहं न तथा अन्यान् गुरुजनान्। न केवलम् अहम् एव तम् अधिकं मन्ये, परम् अन्येषाम् अपि मम सहपाठिनां हृदयेषु तस्य सम्बन्धे अधिका प्रीतिः दृश्यते।

योग्यतमः शिक्षकः

योग्यतमे शिक्षके ये गुणाः तत्त्वतः अपेक्षिताः, ते सर्वे गुणाः प्रायेण श्रीमति आनन्दस्वरूपे दृश्यन्ते। सः स्वविषयं पूर्वतः एव सम्यक् पठित्वा कक्षायाम् आयाति। स्वविषयम् अत्यन्तेन विश्वासेन सह अध्यापयति। कठिनम् अपि विषयम् उदाहरणैः सह सरलीकृत्य उपस्थापयति। तस्य व्याख्यानं छात्रजनः सावधानमनसा श्रृणोति। मन्दबुद्धिः अपि छात्रः सुगमतया विषयम् आकलयति। अध्यापनसमये गुरुमहाभागः पुनः पुनः प्रश्नान् करोति, तेन सर्वेऽपि छात्राः सावधानाः तिष्ठन्ति। छात्राः अपि यान् प्रश्नान् पृच्छन्ति सः तान् सम्यक् समादधते।

छात्रैः सम्बन्धः

अयं शिक्षकमहोदयः प्रतिदिनं छात्राय गृहकार्यम् अपि ददाति। परस्मिन् दिने छात्राणां गृहकार्यं पश्यति। यत्र यत्र प्रमादः वर्तते तत्र तेन निराकरणं क्रियते। छात्राणां पुनः पुनः प्रमादं दृष्ट्वा तस्य मनः खेदं न वहति। यः छात्रः प्रमादं करोति, गुरुवर्यः तं पुनः पुनः बोधयति। तस्य व्यवहारं परिश्रमं च दृष्ट्वा सर्वे छात्राः तस्य आज्ञां परिपालयन्ति।

अध्यापनकौशलम्

गुरुः आनन्दस्वरूपः गणितस्य अध्यापकः अस्ति। अध्यापनकार्ये नैपुण्यं एव सः स्वजीवनस्य साफल्यं मन्यते। समयात् समयं सः छात्राणां गृहमपि गच्छति। तत्र गत्वातान् साहाय्यं यच्छति, सन्मार्गम् उपदिशति च।

अन्यकार्येषु रुचिः

विद्यालयस्य अन्येषु कार्येषु अपि आनन्दस्वरूप-महाभागः परमोत्साहं दर्शयति। यदा तदा कोऽपि वनविहारादिकस्य कार्यक्रमो भवति तस्य भारम् अपि प्रायेण सः एव वहति। शिक्षकवर्गस्य प्रश्नेषु अपि तस्य रुचिः दृश्यते। सः धार्मिकवृत्तिः, उत्साही, प्रमादरहितः, प्रसन्नमुखश्च तिष्ठति। एभिः अन्यैश्च गुणैः सः प्रियः शिक्षकः अस्ति।

17. मम जीवनस्य लक्ष्यम्

मानवमात्रस्य कोऽपि महान् अभिलाषो वर्तते। ममापि कश्चित् मनोरथः अस्ति। अहम् अपि स्वजीवनम् सफलीकर्तुम् इच्छामि।

लक्ष्याणां विविधता

केचित् जनाः धनोपार्जनम् एवं जीवनस्य लक्ष्यं मन्यन्ते। ते सततं तस्मिन् एव दत्तमनसः जायन्ते। केचित् विद्याम् एव पूजायाः करणं मन्यमानाः तत्रैव यतन्ते। केचित् जगति येन केन प्रकारेण प्रसिद्धिम् अधिगन्तुम् इच्छन्ति। केचित् राजनीतिक्षेत्रे ख्याति प्राप्तुम् आकांक्षन्ति। केचित् चलचित्रे अभिनेतृपदम् अभिलषन्ति। केचित् लक्ष्यविहीनाः

एव जीवनं यापयन्ति।

पुष्पाभिलाषवद् मम लक्ष्यम्

मया 'पुष्पस्य अभिलाषः' इति कस्यचित् कवेः कवितां पठित्वा स्वलक्ष्यं निर्धारितम्। एतस्यां कवितायां पुष्पं निजाभिलाषं वर्णयत् कथयति। यत् हे मालाकार, त्वं माम् उत्पाट्य तस्मिन् मार्गे प्रक्षिप यत्र अनेके वीराः मातृभूमेः सम्मानरक्षणार्थं प्राणान् करतलेषु निधाय गच्छन्ति। अधुना मम जीवनस्य लक्ष्यं मातृभूसेवा अस्ति। अहं स्वदेशमानसस्य मराल एव अस्मि—

> **अस्ति यद्यपि सर्वत्र नीरं नीरजमण्डितम्।**
> **रमते न मरालस्य मानसं मानसं विना॥**

अस्य देशस्य भारतस्य असंघटितां दशां दृष्ट्वा मम मनः खेदं वहति। राष्ट्रियचारित्र्यस्य अभावं दूरीकर्तुं अहम् अहोरात्रं प्रयतितुं कामये।

18. मम प्रियः नेता

अधुना भारतस्य जीवनमं समस्याग्रस्तम् अस्ति। यः उचितैः उपायैः तत् जीवनं सुख-शान्ति-सम्पन्नं कर्तुम् उत्साहवान् अस्ति सः एव मया नेतृरूपेण ग्रहीतुं शक्यते। 'श्री अटलविहारी वाजपेयी' एव ईदृश नेता अस्ति यस्य अन्तःकरणे दृढ़विश्वासः अस्ति यत् अयं देशः पुनः शक्तिसम्पन्नो भूत्वा निखिलविश्वस्य मार्गदर्शको भविष्यति।

राजनीतौ स्थापितः आदर्शः

वाजपेयीमहाभागः देसाई-मन्त्रिपरिषदि केन्द्रीयसर्वकारे विदेशमन्त्री आसीत्। उच्चपदे हस्तात् नष्टेऽपि न सः मोहग्रस्तः जातः। सर्वविधं प्रलोभनं दृष्ट्वा अपि सः दलपरिवर्तन न चकार।

शिक्षा

ग्वालियरवास्तव्यः वाजपेयी-महोदयः उत्तरप्रदेशविश्वविद्यालयात् राजनीतौ एम० ए० पीरक्षाम् उत्तीर्णवान्। प्रारम्भतः एव सः प्रखरबुद्धिः प्रतिभाशाली च आसीत्। सः स्वभावतः साहित्य-रसज्ञः कविश्चासीत्। तस्य भाषाप्रेम सर्वाति प्रसिद्धम्।

देशभक्तिभावयुतानि गीतानि विरचय्य सः आधुनिक-कवीनां सम्मुखम् आदर्शम् उपस्थापयाति। हिन्दीसाहित्ये प्रवाहितां वीररसधारां दृष्ट्वा कस्य मनः आन्दोलितं न भवति।

प्रभावी वक्ता

वाजपेयीमहोदस्य सम्पर्कः आरम्भतः राष्ट्रीयस्वयंसेवकसंघेन जातः। अद्य यावत् अयं तेन सहं सम्बन्धं निर्वहति। सः अतिलोकप्रियः वक्ता अति। सः न केवलं संसदि, अपितु जन-मञ्चे अपि निजभाषणैः लोकान् व्यामोहयति।

सांसदः

सः भाजपापक्षतः उत्तरप्रदेशे लक्ष्मणपुरात् निर्वाचितौ भूत्वा लोकसभायाः सदस्यो जातः। अयं मम प्रियो नेता युवकानां हृदय-सम्राट् सकुशलं सुचिरं जीव्यात् इति शम्।

19. संस्कृतभाषायाः गौरवम्

संस्कृतं पुरा भारतीयानां लोकप्रिया जनभाषा आसीत्। रामायण-महाभारतकाले संस्कृतम् एवं जनभाषा-रूपेण प्रचलिता आसीत्।

प्रान्तीयभाषाणां जननी

संस्कृतम् एव आधुनिक-प्रान्तीय-भाषाणाम् एकजननी अस्ति। सर्वासु प्रान्तीयभाषासु प्रतिशतकं षष्टिशब्दाः संस्कृतभाषायाः एव सन्ति। साम्प्रतं संस्कृतमेव प्रान्तीयभाषासु जीवनरसं सञ्चारयितुं प्रभवति। संस्कृतस्य ज्ञानादेव प्रान्तीय भाषाणाम् सम्यग् ज्ञानं भवति।

राष्ट्रभाषायाः उन्नतिकारकम्

अधुना हिन्दीभाषा राष्ट्रभाषा सञ्जाता। तस्य समुन्नतिः कथं स्यात् ? संस्कृतमेव एकमात्रं भाषा यस्याः शब्दकोशः विशालः सुसम्पन्नः च अस्ति। अतः संस्कृतमेव हिन्दी भाषां समृद्धं सम्पन्नं च कर्तुं प्रभवति।

अप्रतिमं व्याकरणम्

संस्कृतस्य व्याकरणम् अपि अप्रतिमम् अस्ति। अस्य व्याकरणस्य अपूर्वा शब्दरचनाशक्तिः विद्यते। यथा आङ्ग्लभाषा लेटिनादितः शब्दान् अङ्गीकृत्य आत्मानं भरति, तथैव संस्कृतभाषातः शब्दान् गृहीत्वा हिन्दीभाषा अपि निजशब्दराशिप्रवर्धनेन आत्मानं सम्पन्नं समृद्धं च कर्तुं पारयति।

विविधशास्त्राणांमूलम्

भाषाविज्ञानस्य सम्यग् ज्ञानार्थं संस्कृतस्य ज्ञानम् अनिवार्यम् अस्ति। काव्यशास्त्रस्य नाट्यशास्त्रस्य च अपि विवेचनं संस्कृतस्य ज्ञानं विना न कोऽपि कर्तुं शक्नोति। भारतीय-पुरातत्त्वस्य छात्राणां कृते तु संस्कृतस्य ज्ञानम् अपरिहार्य वर्तते। प्राच्यभारोपीय-भाषाणां सम्यक्परिशीलनाय संस्कृतस्य ज्ञानम् अत्यावश्यकं वर्तते। भारतीयधर्मस्य संस्कृतेः तत्त्वज्ञानस्य च परिशीलनार्थ संस्कृतम् एव एकः आधारः अस्ति।

गौरवम्

पाणिनिव्याकरणस्य अध्ययनात् अयं बोधो जायते यत् परः सहस्रवर्षेभ्यः प्राक् इयं भाषा चरमां समृद्धिम् अभजत्। न केवलं पौराणिकाः धर्मग्रन्थाः एव संस्कृतभाषायां निबद्धाः सन्ति, अपितु बहवः जैनबौद्धग्रन्थाः अपि संस्कृतभाषायाम् निबद्धाः सन्ति। पालि-प्राकृतभाषाणाम् आकलनम् संस्कृतं विना अपूर्णम् एव अस्ति। अतः संस्कृतभाषायां गौरवं महत्त्वं च सर्वविदितम् अस्ति। भारते भातु संस्कृतम्।

20. व्यायामः

महत्त्वम्

शरीरस्य नीरोगतायाः अनेकानि साधनानि सन्ति। तेषु साधनेषु व्यायामस्य महत्त्वपूर्णं स्थानम् अस्ति। शरीरस्य आरोग्यार्थं प्रतिदिनं यथाविधिः व्यायामः करणीयः। शरीरबलप्राप्तेः प्रधानं साधनम् अपि व्यायाम एव वर्तते। व्यायामशीलो जनः परिश्रमात् न कदापि विरतो भवति। व्यायामस्य प्रभावेण आपत्काले अपि सः साहसं न त्यजति। अपूर्वया प्राणशक्त्या सः आपदः दूरीकरोति।

व्यायामस्य लाभाः

सम्यग् व्यायामेन रुधिरस्य सम्यक् अनिरुद्धश्च सञ्चारो जायते। तेन च सर्वाणि इन्द्रियाणि स्वस्थानि तिष्ठन्ति। कार्ये कुशलता जायते। 'योगः कर्मसु कौशलम्' इति।

बुद्धिः अप्रतिहता तिष्ठति। उदरं न परिवर्धते। परिवृद्धम् उदरं संकोचं गच्छति। उरसि शक्तिः स्फीतता च जायते। स्कन्धद्वयं दृढं पुष्टं सशक्तं च भवति। चक्षु,ः स्फारी भवति। मस्तिष्कम् उर्वरं तिष्ठति।

पौरस्त्याः 'व्यायामाः

कबड्डी, खो-खो, धावनम् मल्लयुद्धम्, मल्लस्तम्भम् दण्डचालनम् इत्यादयः विविधाः पौरस्त्याः व्यायामाः सन्ति। एभिः व्यायामैः विनाधिक व्ययं अधिकाधिकं फलम् अस्ति। योगासनैः प्राणायामैश्च शरीरस्य आमूलचूलं सम्यग् व्यायामो भवति।

पाश्चात्याः व्यायामाः

पाश्चात्याः व्यायामाः क्रिकेट-हाकी-फुटबाल-वालीबाल-बैडमिंटनादयः बहुव्ययसाध्याः सन्ति। तेषु क्रिकेट-हाकी-खेला बहुवारं पारस्परिक-संघर्षस्य कारणानि अपि भवन्ति।

अस्मिन् लोके स्वहितम् इच्छता मनुष्येण निजसामर्थ्यानुसारं वयोऽनुसारं यः कोऽपि व्यायामः करणीयः। शरीरं बिना तु धर्मरक्षा अपि न सम्भवेत् यथा शारीरमाद्यं खलु धर्मसाधनम्।

21. विजया दशमी

विजयस्य आकाङ्क्षा मानवस्य सर्वप्रिया सामान्या आकाङ्क्षा वर्तते। जीवनस्य विकासे अस्याः आकांक्षायाः महत्त्वं सर्वविदितमेव। भारतीयाः प्रतिवर्षं सीमोल्लंघनं कृत्वा शस्त्रपूजनं च कृत्वा विजयप्राप्तेः स्वाकांक्षां प्रदर्शयन्ति। रामस्य रावणोपरि विजयं मानयितुं रामलीलामहोत्सवं कुर्वन्ति। शुम्भनिशुम्भराक्षसोपरि महादेव्या दुर्गया यस्मिन् द्विवसे विजयो प्राप्तः, असौ दिवसः विजयदशमीदिवसः इति भारतीयैः सौल्लासं मान्यते।

विविधाः समारोहाः

आर्यहिन्दुषु प्रचलित विजयादशमीपर्व सर्वस्मिन् अपि हिन्दुसंसारे ससमारोहं मान्यते। आश्विनमासस्य शुक्लपक्षे या दशमी तिथिः तस्याम् इदं पर्व प्रख्यातम्। क्षत्रिया वर्षाकालानन्तरम् अस्मिन् दिने सीमोल्लंघनकर्म कुर्वन्ति स्म। ते अनार्यप्रदेशान् विजित्य तत्रत्यान् लोकान् आर्यबन्धुतायां निवेशयन्ति स्म। तेषां प्रमाणस्य अयमेव आरम्भदिवसः इति प्रसिद्धम्।

रामलीला

अधुना प्रतिनगरं रामलीलायाः समायोजनं भवति। तत्र पूर्वं रामजीवनं रङ्गमञ्चे प्रदर्श्यते। विजयादशम्याः पूर्वं दशदिनानि यावत् रामजीवनस्य मञ्चनं प्रवर्तते। विजयादशमीदिने मुख्योत्सवः भवति। तत्र रावणस्य कुम्भकर्णादीनां महाकाराणि प्रतिरूपाणि अग्नितीरैः दह्यन्ते। तत्पूर्वं श्रीरामपक्षस्य सुरम्ये रथे शोभायात्रा आयोज्यते। दह्यमानानि रावणादिकस्य प्रतिरूपाणि अवलोक्य लोकाः परां शान्तिं लभन्ते। अयं सर्वः समारोहः वृहद्मेलारूपेण आयोज्यते।

दुर्गापूजनम् रामायण पाठश्च

विजयदशम्याः पूर्वं नवरात्रेषु दुर्गापूजनं विधीयते। बङ्गदेशे तु अयमुत्सवः श्री दुर्गापूजा-रूपे एव मान्यते। नवरात्रस्य आरम्भे गृहेषु यव-वपनं क्रियते। नवरात्रतिथौ च यवानां अंकुराणि यथाविधि सम्मान्यन्ते।

अतः विजयादशमीपर्व अधर्मस्य उपरि धर्मस्य, असत्यस्य उपरि सत्यस्य, धूर्तानां चोपरि सज्जनानां विजयस्य प्रतीकः अस्ति।

22. विद्यालयस्य सांस्कृतिकः कार्यक्रमः

अस्माकं विद्यालये प्रतिवर्षं सांस्कृतिक-समारोहः आयोज्यते। गतवर्षे अयमुत्सवः दिसम्बरमासे आयोजितः बभूव। तत्र उपमण्डलस्य कतिपयैः विद्यालयैः अपि भागो गृहीतः। मण्डलशिक्षाधिकारी तत्र प्रधानपदम् अभूषयत्। आदौ अस्माकं विद्यालयस्य छात्राभिः सरस्वती-वन्दनापरा गीतिका गीता। ततः ऊर्ध्वम् देवदत्तेन वीररसमयः कवितापाठो विहितः। तेन कवितापाठेन सर्वं वातावरणं वीरतामयम् अदृश्यत।

नृत्यं रूपकाभिनयश्च

ततो रामजसोविद्यालयस्य छात्राभिः व्रजमण्डलहोलिकानृत्यं प्रस्तुतम्। एतत् नृत्यं तथा सजीवम् आसीत् यथा साक्षात् होलिकाऽवसर एव अत्र अवतीर्णः। तदनन्तरं जिन्दल-पब्लिक-विद्यालयस्य विद्यार्थिभिः एकं संस्कृतरूपकम् अभिनीतम्। तत् भासप्रणीतम् मध्यमव्योयागम् आश्रित्य अवर्तत। सर्वेषाम् अपि पात्राणाम् अभिनयः कौतुककरः आसीत्। तत्पश्चात् अस्माकं विद्यालयस्य विद्यार्थिभिः अपि चारुदत्तनाटकमाश्रित्य अन्यं रूपकम् अभिनीतम्। अस्मिन् प्रयोगे विदूषकस्य चेष्टाभिः वचनैश्च सर्वेऽपि दर्शकाः हास्यसागरे मग्ना इव अतिष्ठन्। पुनः अस्माकं विद्यालयस्य एकेन छात्रेण मूकाभिनयः प्रस्तुतः। तं वीक्ष्य सर्वेऽपि करतलध्वनिभिः त्सय मुहुर्मुहः प्रशंसाम् अकुर्वन्।

श्लोकोच्चारणम् गीतादिकं च

श्रीमद्भगवद्गीतायाः एकादशं अध्यायम् उपजीव्य कतिपय-श्लोकोच्चारणं श्रीदयानन्द-विद्यालयस्य एकया कन्याया प्रस्तुतम्। तत् श्रुत्वा सर्वेऽपि भावमग्नाः रसमुग्धाश्च जाताः। ततो गीतगोविन्दम् उपजीव्य तत्पद्यपाठानुसारि नृत्यम् अस्माकं विद्यालयस्य छात्राभिः प्रस्तुतम्। तदनन्तरम् एकेन गायकेन वेदमन्त्रम् आश्रित्य तस्य वाद्य-वादनैः समं गानं प्रस्तुतम्। सर्वेऽपि श्रोतारः तस्य कण्ठमाधुर्येण संगीतस्य रम्यप्रवाहेण च आलिखिताः इव स्थिताः। अन्ते च सुचिरं तस्य प्रशंसाम् अकुर्वन्।

पुरस्कार वितरणम्

तदन्तरं निर्णायिकानां निर्णयेषु समुद्घोषितेषु सत्सु मण्डलशिक्षाधिकारी पुरस्कारवितरणम् अकरोत्। पुनश्च प्राचार्येण सर्वेषाम् विशेषतः मण्डलशिक्षाधिकारिणः धन्यवादः कृतः। पश्चाच्च कार्यक्रमः सशान्तिपाठं सम्पन्नोऽभवत्।

23. रूप्यकस्य आत्मकथा

नामकरणम्, आकारश्च

मम नाम रूप्यकम् अस्ति। मम नामकरणे इदं कारणं यत् रजतस्य अपरं नाम रूप्यं रूप्यकम् वा। पूर्वं रजकस्य योगेन मम निष्पत्तिः आसीत्। अधुना तु निक्कलादीनां केषाञ्चिद् धातूनां मिश्रणेन मम निष्पत्तिः भवति। मण्डलाकारस्य मम उभयोरपि पार्श्वयोः किञ्चिद् विशिष्टलेखनं जायते।

निष्पत्तिस्थानम्

सर्वेकारणेण प्रस्थापितासु मुद्रानिर्माण-शालासु एव मम निष्पत्तिः क्रियते। मम जन्म-स्थानम् अतीव रहस्यमयं वर्तते। आज्ञप्ताः कर्मचारिणः एव तत्र प्रवेष्टुम् अर्हन्ति। मम अनुजानाम् अपि जन्मस्थानं तत्रैव वर्तते।

महिमा

अहम् अति शक्तिमान् उपयोगी चास्मि। सर्वेऽपि मा लब्ध्वा आत्मानं धन्यं मन्यन्ते। मदर्जनाय सततं यतन्ते। सुरक्षितेषु स्थानेषु निधाय मम रक्षां कुर्वन्ति। मां विना लोकः आत्मानं दरिद्रं पापात्मानं च मनुते। चौराः ममार्थे प्राणान् अपि अविगणय्य साहसम् अनुतिष्ठन्ति। धनाढ्यो जनः मम महत्त्वं जानाति। बालाः अपि माम् इच्छन्ति। स्त्रियोऽपि मां कामयन्ते। वृद्धो जनः मां प्रति लुब्धदृष्ट्या पश्यति। लोकस्य कोमलहस्ततलेन स्पृष्टोऽहं प्रीतोऽस्मि। मयि बद्धा जनानां स्नेहमयी दृष्टिः मम उत्साहं जनयति।

अन्यः आकारः

मम एकः अन्योऽपि आकारः प्रचालतः दृश्यते। एकस्मिन् षडंगुलदीर्घे त्र्यंगुलायते चित्रिते कर्गले 'एकरूप्यकम्' इति मुद्रयते। तेन तत् कर्गलं तावन्मात्रं मूल्यतां वहति। नाऽत्र तथा भारवत्ता यथा धातुनिर्मिते मम शरीरे। इदं स्थानात् स्थानं वोढुं शक्यते। संकीर्णस्थाने अपि बहुसंख्या समाविशति इति अस्य गुणस्थानम्।

24. स्वप्न-वर्णनम्

मया गत-रात्रौ एकः अद्भुतः स्वप्नः दृष्टः। अस्य वर्णनम् पाठकानां मनोविनोदाय कल्पते इति मे विश्वासः। अयं स्वप्नः मया मध्ये रात्रौ तन्द्रापरवशेन दृष्टः।

स्वप्ने कन्यादर्शनम्

मया स्वप्ने काचन दिव्या कन्यका दृष्टा। सा पर्वत-शिखरात् अवतीर्यमाणा आसीत्। तदा एकाँ वृक्षराजिं प्राप्य सा व्यरमत्। उत्सुकतया सा परितो भूभागम् अपश्यत्। तदा सा दक्षिणतः स्वसखीम् अपश्यत्। परस्परं मूकैः विनौदैः ते कालम् अक्षिपताम्।

कन्यया बोधनम्

ततः तयोः अन्यतरा माम् उपेत्य वदति स्म—किं स्वपिषि? किं त्वं सज्जीभूय त्वां प्रतीक्षमाणां स्वप्रेयसीं न पश्यसि मया पृष्टा—कुत्र मम प्रेयसी तिष्ठति? तदा सा मां निजसखीसमीपं नीत्वा अदृश्या अभवत्। तां दृष्ट्वाऽहं किंकर्तव्यविमूढः स्थितः।

फलभक्षणम्

सा देवकन्यका प्रथमं मह्यं खादितुं उत्तमानि फलानि अददात्। अहमपि "आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत्" इति स्मृत्वा विचित्रव्यवहारम् अकरवम्। प्रथमं एकम् फलम् तन्मुखे नीत्वा तदंशम् पुनः स्वयमपि दन्तैः कृत्वा तया सह भक्षणपरः स्थितः।

कन्यायाः अदर्शनम्

तस्या लालित्यं, अंग-मार्दवं, गौर-वर्णता, स्निग्धदृष्टिः च माम् अनिर्वचनीये रागोदधौ अक्षिपन्। तस्याः सखी न तत्र पुनर्दृष्टा। सा च में प्रेयसी अपि 'अहं पुनरपि

कालेन उपस्थिता भविष्यामि' इति प्रतिज्ञाय प्रणष्टा। ततः अकस्मात् निद्राभगात् अहम् अधुना तामेव अनुस्मरन् तिष्ठामि। आशासे सा स्वप्न-सुन्दरी पुनरपि मम स्वप्नमध्ये आयास्यति।

25. वर्षर्तुवर्णनम्

भारते एकस्मिन् वर्षे षट् ऋतवः भवन्ति—वसन्तः, ग्रीष्मः, वर्षा, शरद्, हेमन्तः, शिशिरः च। श्रावणे भाद्रपदे वर्षाकालः भवति। वर्षाकालस्य स्वकीयं सौन्दर्यं महत्त्वं चास्ति।

वर्षायाः प्राक् स्थितिः

वर्षाकालात् प्राक् ग्रीष्मर्तुः भवति। तस्मिन् वसुन्धरा प्रचण्डातपेन सन्तप्ता जायते। जीवलोकः खिन्नः वर्तते। सरांसि शुष्कजलानि सन्ति। वनस्पतिवर्गः परिम्लानोऽस्ति। एव सर्वं जगत् दीन-हीनमिव त्राणम् इच्छति।

रमणीयं दृश्यम्

वर्षर्तौ आकाशे श्यामवर्णाः मेघाः गर्जन्ति। मेघेषु विद्युत् विलसति। वर्षाकाले प्रायः सूर्यस्य अपि दर्शनम् दुर्लभम् अस्ति। मेघानां गर्जनम् श्रुत्वा वने मयूराः नृत्यन्ति। गजेन्द्राः, सिंहाः च प्रसन्नाः भवन्ति। वनेषु वृक्षाः पुष्पिताः भवन्ति। तेषु भ्रमराः गुञ्जन्ति। सरोवराणि जलेन पूर्यन्ते। तेषु कमलानि विकसन्ति। अनेकवर्षाः मण्डूकाः अपि शब्दं कुर्वन्ति। तेषां स्वनैः वायुमण्डलम् आपूर्णं जायते।

मेघवर्षणम्

सूर्यम् आच्छादयन्ती मेघमाला सर्वं लोकं तर्पयति। प्राणिनः अनिमेषं मेघावलीं पश्यन्ति। यथा-यथा घनः वर्षति तथा-तथा भूमिः हर्षाश्रूणि इव मुञ्चन्ती वाष्पं विसृजति। मार्गेषु जलनालिकाः चलन्ति। छदिभ्यः पत्रनालधारासु जलं अधः पतति। सर्व स्थलं जलमयं जायते ।

फलास्वादनम्

अस्मिन् ऋतौ पक्वानि अनेकवर्णानि आम्रफलानि आस्वाद्यन्ते। श्यामवर्णानि जम्बूफलानि स्वादूनि भवन्ति। नारिकेल-दाडिमादीनि अपि वर्षाकाले भवन्ति।

पर्वतानां दृश्यम्

अधिकवर्षाविशात् कदाचित् पर्वतीयप्रदेशेषु शिलाखण्डपातः जायते। मार्गाः पिच्छलाः भवन्ति। यानानि स्खलन्ति। प्राणिनः दुर्घटनाग्रस्तानि जायन्ते। अतिवर्षया सर्वत्र हाहाकारः, त्राहि माम् इति च स्फुरति।

कदाचित् अपकारजनयितुः अपि वर्षाकालस्य काव्येषु रोचकं वर्णनं विद्यते। आदिकविः वाल्मीकिः वर्षाकालस्य वर्णनम् एवम् अकरोत्—

वहन्ति वर्षन्ति नदन्ति भान्ति
ध्यायन्ति नृत्यन्ति समाश्वसन्ति।
नद्यो घना मत्तगजा वनान्ताः
प्रियाविहीनाः शिखिनः प्लवङ्गाः॥

26. वसन्तर्तुवर्णनम्

[*C.B.S.E. (O), 1992*]

ऋतुराजः

भारते षट् ऋतवः सन्ति। तेषु वसन्तः ऋतुराजः अस्ति। अयं चैत्र-वैशाखयोः आयाति ऋतुराजोऽयं कुसुमाकरः अपि कथ्यते। वसन्तस्य आगमने पुष्पाणां विकासः भवति। सर्वत्र सौरभाणां प्रसरः भवति। आकाशं निर्मलं विद्यते। स्वच्छाः दिशः प्रसन्नाः इव भान्ति। नदीषु सरःसु च विमलं जलं राजते। कमलनानि प्रफुल्लितानि सन्ति।

कुसुमाकरः

वनेषु, वाटकासु, उद्यानेषु नानावर्णानि पुष्पाणि शोभन्ते। पुष्पाणाम् उपरि भ्रमराः गुञ्जन्ति। ते च प्रियाभिः सह सानन्दं मधूनि पिबन्ति। मधुना मत्तः पिकः मधुरं कूजति। वृक्षेषु नवपल्लवाः विराजन्ते। आम्रेषु मञ्जर्यः संलग्नाः। कुसुमितं सहकारम् आश्रित्य लता प्रमुदिता। पक्षिणां कलकूजनम् अपि सर्वेषां सुखदं भवति। सर्षपः पीतं वसनं दधानः वासन्तिक विलास प्रकटयति। पुष्पेभ्यः सौरभं, वारिभ्यः शीतलतां चादाय मन्दः पवनः प्रवाति।

जनानां प्रमोदकः

अस्मिन् समये प्रमुदिताः जनाः प्रकृतिशोभां पश्यन्तः भ्रमन्ति। उद्यानेषु, वाटिकासु, नदीतटेषु च लोकाः गीतानि गायन्ति। पशवः पक्षिणश्चापि मोदं वहन्ति। कोकिलाः मदान्विताः मधुरगीतं गायन्ति।

नातिशीतोष्णम्

वसन्ते नाधिकं शीतं भवति न च उष्णता एव, नाधिका वृष्टिः भवतिः, न हिमपातः एव। हरितक्षेत्राणां शोभा पर्यटकानां चक्षुंषि स्वदिशि आकर्षति।

नूतनः रक्तम्

वसन्ते मानवानां शरीरेषु नूतनं रक्तं संचरति। स्वास्थ्यस्य दृष्ट्वा अयं कालः सर्वोत्तमः कथ्यते। 'वसन्ते भ्रमणं पथ्यम्' इति प्रसिद्धिः। कृषकाः निजक्षेत्राणि, पक्वेन अन्नेन समृद्धानि दृष्ट्वा सोल्लासं नृत्यन्ति। सत्यमेवोक्तं केनचित् कविना—सर्वं सखे चारुतरं वसन्ते !

27. ग्रीष्म-वर्णनम्

भारतदेशे सर्वेऽपि षट् ऋतवः चक्रवत् परिवर्तन्ते। वसन्तकाले समाप्ते ग्रीष्मकालः समायाति। अयं 'मई', 'जून' इति द्वयोः मासयोः प्राधान्येन भवति। ज्येष्ठमासे रविः अतिशयं तपति। ग्रीष्मे रविकराः धरायाम् तिर्यक् न पतन्ति, तेषां सरलावपातेन उष्णता परिवर्धते। उष्णाः रश्मयः वायुमपि उष्णं कुर्वन्ति। तप्तो वायुः परिसर्पन् अग्निः इव सर्वान् तापयति दहति, च।

रात्रौ आनन्दानुभूतिः

ग्रीष्मर्तौ रात्रिः संकुचिता जायते। दिनानि दीर्घाणि भवन्ति। दिने सन्तप्ताः जनाः रात्रौ एव किंचिद् आनन्दं लभन्ते। समर्थाः जनाः दिनेऽपि विद्युद्-व्यजनानि आयोजयन्ति। साधनसम्पन्नानां गृहाणि वातानुकूलितानि भवन्ति। यदि कदाचित् विद्युद्-धारा नायाति, तदा ते अपि ग्रीष्मप्रभावं सहन्ते। केचन जनाः ग्रीष्मकाले

पर्वतीयप्रदेशेषु गच्छन्ति, मन्सूरी, शिमला, नैनीताल आदि नगराणि गच्छन्ति। दरिद्राः साधनहीनाश्च जनाः बहुतरं कष्टं लभन्ते। केचन उष्णवाताभिहताः सन्ति, अन्ये जलम् अलभमानाः प्राणान् सन्त्यजन्ति। अनाहूताः मशकाः कर्णविवरं सम्पतन्ति। ते लोकानां निद्रा-भंग जनयन्ति।

जलस्थितिः

सूर्यस्य तापेन जलाशयाः परिशुष्यन्ति, कूपेषु जलस्य स्तरम् अति नीचैः गच्छति। तापेन पर्वतेषु हिमं गलति।तेन नदीषु जलप्रवाहो वर्धते। वृक्षाणां पल्लवानि प्रायेण शुष्यन्ति। नराणां पशूनां च जीवनं जलाभावात् अति दुर्भरं जायते।

जनरूचिः

ग्रीष्मर्तौ जनानां शीतलपेयेषु रुचिः वर्धते। लोकाः शर्करा-खण्ड-युतं शीतलं जलं पिबन्ति। समर्थः जनः अधुना शीतलजल-लाभाय फ्रिजयन्त्रस्य उपयोगं करोति। अन्ये जनाः घटानाम् उपयोगं कुर्वन्ति। वृक्षाणां छाया अस्मिन् ऋतौ अतीव सुखदायिनी भवति। फलेषु खरबीजफलानि, तरबीजफलानि, कर्कटिकादीनि अस्मिन् ऋतौ एव भवन्ति। आम्रफलानि अपि कदाचित् दृश्यन्ते। तक्रस्य प्रयोगः ग्रीष्मकाले गुणकारी वर्तते। निर्धनाः जनाः ग्रीष्मकाले अधिकं संतोषं प्राप्नुवन्ति यतोहि अल्पाल्प-परिधानेन छदिविरहितावासेन वृक्षछायासु स्थित्वा, आकाशाधस्ताद् वा शयित्वा जीवनं यापयन्ति।

28. विद्या

विद्यायाः महिमा विचित्रो वर्तते। विद्याधनं सर्वधनप्रधानम् अस्ति। अन्ये सर्वे धनाः तु व्यये कृते क्षीणाः जायन्ते पर विद्याधनं व्यये कृते अपि वर्धते। यदा जनाः विद्यां वितरन्ति, तदा तेषां विद्या वृद्धिं गच्छति। विद्याधनम् ईदृशं धनम् अस्ति यत् न तु चौरः अपहर्तुं शक्यते न च राजशक्त्या तस्य हरणं जायते।

अपूर्वसुखप्राप्तिः

विद्यया जनाः अपूर्व सुखं लभन्ते। विद्या जनेभ्यः विनयं ददाति। तस्मात् विनयात् जनः पात्रत्वम् आप्नोति। पात्रत्वात् सः धनं प्राप्नोति, तदा धनात् धर्मं लभते। धर्मात् नरः सुखी भवति।

विद्यावन्तः पूजार्हाः

विद्यावान् नरः सर्वत्र पूजार्हः भवति। सः स्वदेशे अपि सम्मानं प्राप्नोति, परदेशे अपि सः आदरम् अवाप्नोति। ये कुलीनाः जनाः विद्यारहिताः सन्ति, ते समाजे न तथा सम्मान्यन्ते यथा विद्यावन्तः जनाः पूजार्हाः भवन्ति। ये छात्राः विद्यार्जनं कठोरं श्रमं कुर्वन्ति, ते विद्याव्यसनिनः विद्यार्थिनः उन्नतिपथं प्रसरन्ति। अध्ययने नैपुण्यं प्राप्य एते छात्राः सर्वेषां प्रशंसापात्रं भवन्ति।

द्विविधं स्वरूपम्

विद्यायाः द्विविधं स्वरूपं विद्यते—परा अपरा च। विद्यायाः इत्थं द्विविधं क्षेत्रम् अस्ति यथा भौतिकम् आध्यात्मिकम् च। समस्तं बौद्धिकं ज्ञानं भौतिकविद्या अस्ति यथा कलाः विज्ञानानि च । सा अपरा विद्या इति। सम्पूर्णम् आध्यात्मिकं ज्ञानं परा विद्या इति यया जनः आत्मनः स्वरूपं विज्ञाय परमात्मानम् साक्षात्कर्तुं प्रयतते।

अनुपमः महिमा

विद्या बहुहितकरी यशःसुखकरी च अस्ति। सा तु सर्वाधिकं नरस्य रूपम्। विद्याविहीनः नरः पशुतुल्यः अस्ति। विद्वान् जनः इहलोकं परलोकं च साधयति। अतः विद्यायाः महिमा अनुपमः अस्ति। आत्महिताय नरेण विद्याभ्यासः सततं करणीयः।

29. पर्वत-यात्रा

अथवा

स्मरणीया यात्रा

प्रस्तावना

पर्वतयात्रा लोकेभ्यः अतीव आनन्ददायिनी भवति। ये जनाः पर्वतेषु वासं न कुर्वन्ति तेभ्यः पर्वतयात्रा अत्यधिक-रम्या रुचिकरी चास्ति। ते प्रतिवर्षं अदृष्टपर्वत-स्थानानि द्रष्टुं कामयन्ते। ईदृशी यात्रा स्मरणीया यात्रा भवति।

मंसुरी यात्रा

गतसप्ताह अहमपि चतुर्भिः मित्रैः सह मंसुरीयात्रार्थं गृहात् निर्गतः। देहरादून-नगरं तु वयं बसयानेन प्राप्ताः। ततस्तु मंसूरी प्रति पद्भिः एव वयं प्रस्थिताः। पर्वतमार्गः अतिदुरारोहः आसीत्। पर्वतोपत्यकास्थं राजपुरं नाम उपनगरं प्राप्य वयं विषम-मार्गम् आरोढुं तत्पराः आसन्।

पर्वतारोहणम्

अयं मार्गः प्रतिपदं पाद-स्खलनोन्मुखः आसीत्। अयम् उत्तरोत्तरं आरोहम् एव याति स्म। मध्ये कुत्रापि अवरोहः नासीत्। पादक्षेपे एकस्य अपि पलांशस्य असावधनता। पादभङ्गं जनयेत्। अवपतनात् नासाभंगः, दन्तभंगः, मस्तभंगो वा भवत्। वयम् अतिसावधानतया दीर्घं निःश्वसन्तः शनैः शनैः ऊर्ध्वं गच्छामः स्म। मार्गे क्वचित् होरां यावत् विश्रम्य, स्रोतसा जलं प्रपीय मन्सूरीं प्रविष्टाः।

पर्वतीयदृश्यदर्शनम्

अपरस्मिन् दिने प्रातराशात् निवृत्ताः वयं दृश्यदर्शनहेतुना प्रचलिताः। सौधान् हर्म्यान्, जनाकीर्णहट्टान् उदूढभारान् पर्वतीयान् च पश्यन्तः इतस्ततो विहारम् अकुर्म। प्रदोषकाले पर्वतम् अधस्तात् प्रकाशवर्त्तकाः दूराद् दूरं दीपमालेव अदृश्यन्त।

जलप्रपातदर्शनम्

अन्यस्मिन दिने वयं जलप्रपातं द्रष्टुं चलिताः। जलप्रपात-स्थाने दृश्यम् अतीव आनन्दप्रदम् आसीत्। अधुना अपि स्मर्यमाणाः पर्वताः माम् आह्वयन्तः इव प्रतीयन्ते।

30. रेल-यात्रा

अधुना रेलयात्रा अतीव सामान्या यात्रा जाता। वयं नगरेषु प्रतिदिनं रेलयानस्य गमनागमनम् अवलोकयामः। रेलयात्रां कुर्वन् जनः अधुना कीदृशम् अनुभवति इति ममानुभवेन ज्ञातुं शक्यते।

दिल्लीतः कालिकातां यावत्

गतवर्षे अहं दिल्लीनगरात् कालिकाता-नगरीं यावत् रेलयानेन गतः। दिल्लीनगरात् कालिकातानगरस्य दूरी 1440 किलोमीटर आसीत्। यात्रादिनात् दशदिनपूर्वं मया द्वितीयश्रेण्याम् आरक्षणं कारितम्। सायंकाले पञ्चवादने अहं

दिल्ली-स्थानात् यानम् अगृह्णाम्। यद् रेलयानं निश्चितं लोहमार्ग सम्प्राप्तः तदा भारवाहकाः अन्ये यात्रिणः च दभ्रान् पश्यन्तः स्वस्थानानि ग्रहीतुं चेष्टमानाः आसन्। यत्र तत्र महान् कोलाहलः समारब्धः। मया तु स्वदभ्रं दृष्ट्वा तत्र आसक्तायां सूच्यां स्वनाम पठित्वा स्वस्थानं गृहीतम्।

रेलयानप्रस्थानम्

अर्धहोरानन्तरं रेलयानं ततः प्रस्थितम्। अधुना गन्त्रं (इञ्जन) अतिशयजवेन धावमानम् आसीत्। अस्माकं दभ्रे कश्चन फलविक्रेता अपि प्रविष्टः। सः स्वफलानि विक्रेतुम अयतत परं जनाः तस्मिन् अधिकां रुचिं न प्रादर्शयन। कियत्कालानन्तरं भोजनदभ्रस्य कर्मचारी आगत्य यात्रिणः रात्रिभोजनार्थम् तेषाम् आवश्यकतां लिखित्वा गतः। आरक्षितदभ्रस्य अधिकारी आगत्य माम् चिकिटम् अयाचत् तत्र च स्वाक्षरचिह्नं कृत्वा पुनः मामेव प्रायच्छत्।

गन्तव्यप्राप्तिः

रात्रौ नववादने भोजनं समाप्य अहं स्वशयनस्थाने विष्टरादिकस्य व्यवस्थाम् अकरवम्। प्रातः चतुर्वादने अहं शयनात् उत्थितः स्व-संभारं सम्यक् समवलोक्य मुखधावनम् अकरवम्। पंचवादने तत् यानम् हावड़ा-स्थानं प्राप्तम्। इदमेव मम गन्त-व्यस्थानम् आसीत्। अहं स्वसंभारं भारवाहकस्य शिरसि स्थाप्य द्वारे चिकिटं अधिकारिणे समर्प्य रेलस्थानात् वहिः समागतः। इत्थं मम रेलयात्रा सुखेन सम्पन्ना जाता।

31. प्रिया क्रीडा (कबड्डी)

क्रीडायाः विशेषाः

'कबड्डी' मम प्रिया क्रीडा अस्थि। इयं क्रीडा ग्रामेषु अतीव प्रचलिता अस्ति। अस्याः क्रीडायाः केचन विशेषाः सन्ति। अस्याः प्रथमम् वैशिष्ट्यम् अस्ति यत् अस्याम् क्रीडायां धनस्य व्ययं विना अपि शरीरस्य पूर्णः व्यायामः भवति। अस्या द्वितीयम् वैशिष्ट्यम् अस्ति यद् इयं भारतस्य प्राचीना प्रसिद्धा क्रीडा अस्ति अतः भारतीय वातावरणस्य सर्वथा अनुकूला वर्तते।

क्रीडा-स्वरूपम्

इयं क्रीडा श्वासावरोधक्रीडा वर्तते। क्रीडकाः श्वासावरोधने दक्षाः ते अस्याम् अतीव निपुणाः सन्ति। अस्यां क्रीडायां-दलद्वयम् वर्तते । समस्तं क्रीडाक्षेत्रं द्वयोः समानभागयोः विभक्त वर्तते। तयोः मध्ये स्थिता 'पाला' नाम्नी रेखा वर्तते। प्रत्येकदले प्रायेण नव नव क्रीडकाः सन्ति। कदाचित् एतेषां क्रीडकानां संख्या प्रत्येकभागे एकादश एव वर्तते।

क्रीडाविधिः

क्रीडारम्भे एकभागस्य एकः क्रीडकः द्वितीयभागस्य क्रीडाकानाम् अग्रे 'कबड्डी-कबड्डी' इति वदन् गच्छति। स एकम् एकाधिकं वा क्रीडकं स्पृष्ट्वा श्वासग्रहणं विनैव मध्यरेखां यावत् प्रत्यागच्छति। द्वितीयभागस्य क्रीडकाः तं ग्रहीतुं यतन्ते परं सः

तेभ्यः आत्मानं रक्षित्वा स्वदलं प्रत्यावर्तते। सः यान् यान् स्पृशति ते उपविशन्ति, तत्कारणात् च तेषां अकह्यानिः अपि भवति। एवं निश्चितकालावधि क्रीडन्तः यस्य पक्षस्य क्रीडकाः अधिकम् अंकं प्राप्नुवन्ति असौ पक्षः विजयी भवति।

क्रीडा-महत्त्वम्

भारतीयक्रीडासु 'कबड्डी' क्रीडायाः महत्त्वपूर्ण स्थानं वर्तते। विद्यालयेषु अस्यां क्रीडायां छात्राः अनायासमेव लभ्यन्ते। ग्रामेषु नगरेषु च समायोजितेषु सम्मेलनेषु अस्याः क्रीडायाः प्रतियोगिताः प्रायेण आयोज्यन्ते। तत्र च दर्शकानां महती संख्या भवति।

32. गृहोद्यानम्

स्थितिः

मम गृहस्य पृष्ठभागे एकम् रम्यम् उद्यानम् अस्ति। स्थानस्य न्यूनता-वशात् तत् लघु एव। अनेन उद्यानेन गृहस्य समीपे हारित्यं, पुष्पाणां सौन्दर्य च सदैव अस्माकं चक्षुषि समाविशति। मनः उल्लसितं भवति। अपरा उपयोगिता गृहोद्यनस्य इयं वर्तते यत् किंचित् ऋत्वनुकूल शाकादिकं फलादिकं च लब्धं स्यात्। ग्रीष्मे आतपवारिणी सुखदायिनी छाया लभ्यते। प्रातः सायं च हरिते सस्ये नग्नपादैः विहारः कृतः स्यात्। गृहोद्यानस्य रक्षणे गृहस्वामिनः तस्य परिवारस्य च कश्विद् व्यायामोऽपि स्वतः जायते, वनस्पतिशास्त्र-विषयिकी ज्ञान-वृद्धिरपि शनैः शनैः भवति।

उद्यान-कार्याणि

अहं क्षुरप्रेण कदाचित् प्रातः, कदाचित् सायं, अनध्ययनदिवसे तु प्रायेण सर्वं दिनमपि, भूमिं म्रदयामि खनामि च। कदाचित् तत्र लघु केदारान् करोमि, यथर्तुं गृञ्जनं, मूलिकां, पालकं, मरिचं, गोजिह्वं, कर्कटिकादीन् च तत्र उत्पादयामि। प्रथमं तेषां बीजानि वपामि, काले च जलेन पादपान् सिञ्चामि, पक्वानि फलानि च आहर .।

फलिनः वृक्षाः

मार्गम् अभितः मम गृहोद्याने केचन छायावन्तः पुष्पफलवन्तश्च वृक्षाः सन्ति। आम्रेषु अपि फलम् जायते। अमरूदवृक्षाः अपि फलन्ति। जम्भीरं सर्वमपि वर्षं फलाति।

पुष्पिताः पादपाः

गृहोद्यानिकोणेषु रजनीगन्धायाः विटपो विराजते। विविधवर्णाः पाटलाः आमोदपूर्णः सुपुष्पैः बालात् दर्शकानां चक्षूंषि आकर्षन्ति। पुष्पाणां प्रयोगः यदा कदाचित् मालाग्रथनाय अपि जायते। अधुना सर्वेषा कार्यस्य आधिक्यात् सुदूरं प्रकृतेः शोभां द्रष्टुं समयस्य अभावः वर्तते। गृहोद्यानं तस्य अभावस्य पूर्ति करोति। कार्यात् श्रान्तस्य अनायासमेव विश्रामो जायते। पुष्पाणाम् आमोदेन अपारा तृप्तिः इव अनुभूयते। यत् किंचित् शारीरिकं स्यात् तेन स्वास्थ्यं वर्धते। श्रमस्य गौरवस्य साक्षात् दर्शनं जायते। अहं निजगृहोद्यानम् इन्द्रस्य लघु नन्दनवनम् इव मत्वा हृष्यामि।

33. अनुशासनम्

विनयस्य महिमा

प्राचीन-संस्कृत-साहित्ये विनयस्य महिमा बहुशः वर्णितः दृश्यते। विनयमधुरः स्वभावः सर्वप्रियः वर्तते। विनयात् जनः पात्रतां याति। अयं विनयः एव अधुना अनुशासन-पदेन कथ्यते।

अनुशासनस्य स्वरूपम्

किमिदम् अनुशासनम् इति। शासन-पदास्य अर्थः 'आज्ञा' इति। अनुशासनपदस्य अर्थः 'आज्ञा-पालनम्' इति। आज्ञापालनम्, स्वयं स्वीकृतं नियम-पालनम् इत्यादयः गुणाः अनुशासने समायान्ति।

राष्ट्रजीवने अनुशासनम्

वयं भारतीयाः स्वतन्त्र-राष्ट्रस्य नागरिकाः स्म। अस्माकम् एकं संविधानम् अस्ति। तत्र नागरिकैः अनुवर्तनीयाः बहवः नियमाः सन्ति। अनुशासितनागरिकस्य इदं कर्तव्यम् अस्ति यत् सः स्व-संविधान-स्वीकृतान् नियमान् पालयतु। यदि सः तथा करोति तदा तस्य देशः समुन्नतिं करोति। यदि सः अनुशासन-हीनतां प्रदर्शयति, तदता राष्ट्रजीवनम् संकटोपपन्नं जायते।

विद्या ददाति विनयम्

अधुना गुरुकुलेषु विश्वविद्यालयेषु छात्राः विद्यां तु लभन्ते परं विनयं न प्राप्नुवन्ति। आधुनिकी शिक्षा वस्तुतस्तु शिक्षा एव व वर्तते यतः कविनोक्तम् यत् 'विद्या ददाति विनयम्'। या विनयं न ददाति सा कीदृशी विद्या? अनुशासनस्य शिक्षां विना कीदृशी विद्या?

छात्रजीवने अनुशासनस्य शिक्षणम्

नागरिकाः अनुशासनस्य शिक्षां बाल्यावस्थायां, विशेषतः छात्रावस्थायामेव, ग्रहीतुं पारयन्ति। यदि शासनं स्वदलस्य मोहं परित्यज्य विद्यार्थिनां सम्मुखं स्वकर्तव्यरायणतायाः आदर्शं समुपस्थापयेत् तदैव छात्राणां अनुशासनस्य शिक्षा प्रदेया भविष्यति, राष्ट्रं च परं वैभवं गमिष्यति।

34. पर्यटनम्

देशाद् देशम् अटनं 'पर्यटनम्' इति कथ्यते। पर्यटनम् अतीव रुचिकरं शिक्षाप्रदं साधनम् अस्ति। इदं न केवल ज्ञानवर्धनम् अस्ति अपितु स्वास्थ्यकरं मनोरञ्जकं चापि वर्तते। पर्यटनस्य विविधाः रूपाः सन्ति। केचन पद्भ्यामेव पर्यटन कुर्वन्ति। ईदृशे पर्यटने सूक्ष्मं स्थान-निरीक्षण वस्तु-निरीक्षणं प्रकृतिदर्शनं च कर्तुं शक्यते परम् आधुनिके वैज्ञानिके युगे ईदृशं पर्यटनं जनाः नाधिकं मानयन्ति। अस्मिन् युगे तु द्रुतगामि-यानैः एवं पर्यटनम् अतीव लाभकरं मन्यते।

चित्तौडगढवर्णनम्

मया गतवर्षे चित्तौडगढनाम्ना प्रख्यातं नगरं पर्यटनाय गतम्। प्रथमं मया तत्र रेल-अवरोध-स्थानस्य समीपस्थं आर्यगुरुकुलं दृष्टम्। तद् दृष्ट्वा अहम् एकं मार्गदर्शकं पुरस्कृत्य चित्रकूट-दुर्गं द्रष्टुं प्रचलितः। इदं तद् दुर्गं यत्र पद्मिनी जीविता एव अग्निम्

संधुक्ष्य अन्यैः राजपुत्रमहिलाभिः सहिता हविः इव पतिता। कष्ट-प्रवेश्यम् इदं दुर्गम् अत्यन्तवक्रमार्गम् अभेद्य-कपाटञ्च। अधस्तात् भूमौ मुस्लिमर्-सेनाः अन्तः प्रवेशाय कृतारोहाः अतिष्ठन्। दुर्गस्य मध्यस्थिताः राजपुत्राः यवनाक्रमणं निरोधाय प्रचण्डपराक्रमाः अतिष्ठन्। तीव्र-शंकु-खचितानि कपाटानि हस्तिभिः अपि अभेद्यानि दृष्टानि। अधित्यकासु दुर्गस्यभवनानि रहस्यमयगमनागम-मार्गश्च अदृश्यन्त।

दर्शनीयानि स्थानानि

तत्र एकतः देवीमन्दिरं, यत्र भक्तिनी मीरा होराः यावत् स्थित्वा भक्तिमयैः गीतैः उपासनां करोति स्म। अन्यतो दर्शनीयं जैनमन्दिरं यत्र जैनलोकः आगत्य प्रणमति। क्वचित् दीर्घाः जलापूर्णाः तडागाः यत्र गजाः जलक्रीडापुरस्सरं स्नान्ति स्म। एकस्मिन् पार्श्वे तत् स्थानम् यत्र पद्मिनी अपरागारवर्ति-काचादर्श-बिम्बात् धर्मसंकटवशात् आत्मानं यवनाधिपं दर्शयितुं स्थिताऽभवत्।

कीर्तिस्तम्भः

अन्यत्र आकाशचुम्बी कीर्तिस्तम्भः आसीत् यत्र आरुह्य परितः सर्व दृग्गोचरं जायते। अत्र पतनभयात् हृदयं सुतमां कम्पेत। ततः उद्यानानां शोभां वीक्ष्य अहं परस्मिन् दिने ततोऽन्यत्र प्रस्थितः।

35. परोपकारः

[*C.B.S.E. (O), 1992*]

भवन्ति नम्रास्तरवः फलोद्गमैः
नवाम्बुमिर्भूमिविलम्बिनो धनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष। परोपकारिणाम्॥

अन्यस्य जनस्य हिताय यत् कार्यं चिन्तनं वा तदेव परोपकारः। मनुष्यस्य मध्ये प्रवृत्तिद्वयं दृश्यते, एका स्वार्थस्य, अपरा परोपकारस्य।केचन तादृशाः अपि सन्ति, ये न स्वार्थं समीहन्ते, न च परोपकारं कुर्वन्ति। ते जनाः अतीव अधन्याः समाजाय च अभिशापरूपाः एव।

परोपकारिणः वृत्तिः

यस्य केवला स्वार्थबुद्धिः सः राक्षसः इव सततम् आचरति। ततः वरतराः ते जनाः ये यद्यपि सर्वात्माना आत्मंभरयः, परं ते परमुखापेक्षिणः न तिष्ठन्ति। यः खलु स्वार्थं सेवमानः परमार्थम् अपि चिन्तयति, करोति च यथाशक्ति, सः एव पुरुषः प्रशस्यः।

परोपकारिणः मानसिकता

परमार्थबुद्धिः मनुष्यस्य यशसे कल्पमाना तस्मिन् औदार्य निवेशयति। तादृशः नरः सर्वेषां हृदयसम्राट् इव विराजते। सः हि क्षुधितस्य क्षुधां शमयति, दरिद्रस्य कामान् अपि दोग्धि। तेन लोकः तृप्तः इव आत्मानम् अनुभवति।

सज्जनानां जीवने

सज्जनानामिह भूतले आगमनं परोपकाराय एव भवति। नहि सामान्यजनानां इव तेषां जीवनस्य लक्ष्यं स्वार्थसाधनम्। अद्यत्वे सर्वत्र स्वार्थान्धकारस्य साम्राज्यम् वर्तते।

केचन सन्तः एव परोपकार-प्रकाशेन तद् अन्धकारं दूरीकृत्य संसारम् आनन्दयन्ति यदि सन्तः स्वजन्मना इमां पृथ्वीं न पावयेयुः तदा इयं पृथ्वी नरकतुल्या भवेत्। दुर्लभाः खलु सन्तः, तेषां निकषोऽपि कठिनः। कविभर्तृहरेः शब्देषु यथा—

मनसि वचसि काये पुण्यपीयूषपूर्णास्
त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः।
परगुणपरमाणून् पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः॥

येषां जन्म जगतः कल्याणकामनायै भवति, ते एव सज्जनाः। महापुरुषः खलु प्रच्छाय-तरुः इव भवति यः—

सहति च किल मूर्ध्ना पादपस्तीव्रमुष्णम्
शमयति परितापं छायया संश्रितानाम्॥

परोपकारे रतानां सज्जनानां मनांसि न तथा निजदुःखेषु द्रवन्ति यथा परविपत्तिषु। संसारस्य उपकारः तेषां जीवनस्य चरम् लक्ष्यम् अस्ति।

36. कुम्भपर्व

अहं कुम्भपर्वणि एकदा हरिद्वारम् उपागतः। तत्र दश-लक्ष-संख्यकानां जनानां संकुलः जातः। ईदृशं कुम्भ-पर्व भारतवर्षे हरिद्वारनगरे, प्रयागनगरे, उज्जयिन्यां, नासिकनगरे च प्रतिद्वा दशवर्षं समायोज्यते।

धर्मशालायां निवासः

अहं वाष्पयानेन हरिद्वार-रेल-यानावसथं (रलवे स्टेशन): सम्प्राप्तः, ततो मुनिहरमिलापीधर्मशालायाम् एकं कोष्ठ लब्धवान्। तत्र स्ववस्तूनि तालकान्तः निधाय तीर्थस्थलानां पर्यवेक्षणाय प्रचलितः। तत्पश्चाद् अहं ज्वालापुरगुरुकुलं परिभ्रम्य दक्ष-प्रजापति-मन्दिरं च पश्यन् "हर की पौड़ी" इत्यभिधं लोकविश्रुतं स्थानं प्राप्तः।

कुम्भपर्वणि स्नानम्

अस्मिन् स्नाने स्नानार्थम् सहस्रशः जनाः पंक्तिबद्धाः एकैकशः कृत्वा शनैः शनैः अग्रे गच्छन्तः प्रसिद्धां गंगामन्दिरनिकटस्थां स्नानभूमिं गच्छन्ति स्म। अहमपि होरामनन्तरं तत्स्थानं गतः। अत्र श्रद्धालवः पूजा-पिण्डदान-स्नान-मन्त्रपाठादिषु धार्मिक-कृत्येष व्यापृताः तिष्ठन्तः कुम्भपर्वणः पुण्यम् अर्जयन्ति स्म। मयाऽत्र पञ्चदशपलभ्यो वेदपाठं विधाय स्नानं कृतम्।

तीर्थस्नानानां दर्शनम्

ततोऽहं 'सप्तर्षिमन्दिरम्' इति स्थानम् उपगम्य ऋषीणां मूर्तिदर्शनं कुर्वन् भित्तिषु लिखितान् श्लोकान् मन्त्रांश्च पठन् अभिनन्दन् च गीतामन्दिरम् उपागतः। तत्पश्चादहं नृसिंहमन्दिरं प्रयातः। अत्र नृसिंहावतारस्य विशालं चित्रं तद्विषयकी कला च भित्तिषु अंकिता दृष्टा। गंगामन्दिरे श्रीगंगामातुः धवलधारं चित्रम् अतीव रम्यम् आसीत्। अत्रापि गंगालहरी इत्याख्या स्तुतिः मन्दिरभित्तिषु लब्धा। अन्यानि अपि तीर्थस्थलानि मन्दिराणि च मया दृष्टानि। तेषु परमार्थ-निकेतनं, भारतमातुः मन्दिरं च विशेषतः उल्लेखनीयं स्तः। सर्वत्र यात्रिणां पवित्रभावान् दृष्ट्वा मम मनः पुलकितं जातम्।

सम्मेलनानि

अस्मिन् अवसरे विविधाभिः सामाजिक-धार्मिक-संस्थाभिः सम्मेलनानि अपि

समायोजितानि। विशेषेण समुल्लेखनीयं सम्मेलनं विश्वहिन्दुपरिषदा समायोजितम्। अत्र मया पूज्यपाद-शंकराचार्य-महाभागानाम् अपि पुण्यदर्शनम् कृतम्।

37. हिमालयः

नगाधिराजः हिमालयः भारतस्य उत्तरस्यां दिशि विराजते। सः प्रहरी इव भारतं रक्षति। सः भारतमातुः शिरसि मुकुटः इव शोभते। अस्य गोरीशंकरो नाम शिखरं संसारस्य समस्तेष्वपि शिखरेषु उच्चतमम् अस्ति। सत्यमुक्तम् महाकविना कालिदासेन कुमारसम्भवे—

अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधीऽवगाह्य
स्थितः पृथिव्यामिव मानदण्डः॥

अद्वितीयः महिमा

हिमालयस्य महिमा अद्वितीयः वर्तते। अयं परमौषधीनां रत्नानाम् च महान् आकरोऽस्ति। गंगा-यमुना-प्रभृतयः प्रमुखाः नद्यः हिमवतः एव प्रभवन्ति। एताः सरितः भारतस्य कृषिसेचनाय भूमिं च शस्यश्यामलां करणाय साधनभूताः तिष्ठन्ति।

देवतात्मा

हिमालयः देवतात्मा अस्ति। अत्र देवतानां निवासः वर्तते। महादेवः सपरिवारः अत्रैव तिष्ठति। पार्वती अत्रैव तपः तप्त्वा शिवं लब्धवती। भारतीयानां नैकानि तीर्थानि हिमालये एव सन्ति। तपस्विनः हिमाद्रेः गृहासु निविश्य तपस्यां कुर्वन्ति।

पर्यटकानाम्

शान्ताः तपस्विनः, विश्रामेच्छुकाः गृहस्थाः, पर्यटकाः पर्वतशिखराणि आरुह्य हिमालयं गच्छन्ति। तत्र गत्वा यथेष्टं विहरन्ति निजाभीष्टं च लभन्ते। औषधीनाम् अन्वेषकाः नराः अत्र आगत्य जीवनदायिनीः औषधीः आप्नुवन्ति। कलकलं नदन्त्यः निर्झरिण्यः, रम्याः निर्झराः, शोभनाः सरोवराः, फलिनः वृक्षाः, पुष्पिताः लताः सर्वाः एव यात्रीणां मनोविनोदं कुर्वन्ति।

एवं हिमालयः भारतवर्षाय वरदानस्वरूपः अस्ति। अयं भारतस्य पितृवत् परिपालकः आस्ति। पुराकाले शत्रवः एनम् उल्लङ्घ्य भारतं प्रवेष्टुं न प्राभवन्। हिमालये स्थितं त्रिविष्टपदेशं पुरातनैः मनीषिभिः स्वर्गम् इति अमन्यत। अधुना तद् देशं चीनराज्यान्तर्गतं वर्तते। चीनस्य आक्रमणेन अस्माकं नेत्रोन्मीलनं जातम् । यतः अधुना भारतीय-सैनिकाः प्रतिक्षणं सन्नद्धाः भूत्वा संचरन्ति।

38. गंगा

पुण्यतमा नदी

भारतं पृथिव्याः स्वर्गः कथ्यते। अत्र गंगासदृश्यः नद्यः प्रवहन्ति यासां पीयूषतुल्यं जलम् अस्य भूमिं सिञ्चति। गङ्गाजलं विषये कविनोक्तम्—

गांगं वारि मनोहारि मुरारिचरणच्युतम्। गंगाजलं पापहारि वर्तते। गंगा नदी भारतस्य सर्वासु नदीषु पुण्यतमा मन्यते।

गङ्गास्नानस्य महत्त्वम्

भारतीयानाम् विश्वासः यत् अस्यां स्नात्वा नरः पापाद् विमुच्यते। दैहिकतापाः तु सद्यः एव शान्ताः भवन्ति। मनसि अपि पवित्रभावानां सञ्चारः भवति। अत एव जनाः स्नानपुण्यलाभाय गंगायाः तीरे निवसन्ति।

पौराणिकवर्णनम्

गंगायाः बहूनि नामानि सन्ति यथा जाह्नवी, भागीरथी, हैमवती, सुरसरित्। पौराणिकवर्णनानुसारं गंगा विष्णोः पादाङ्गुष्ठात् निःसृता जायते। पुरा एषा स्वर्गे प्रवहति स्म। महाराजः भगीरथः स्वपूर्वजानाम् उद्धाराय गंगा स्वर्गात् पृथिव्याम् आनयति स्म। इयं शिवस्य जटासु प्रवहन्ती पृथिव्याम् अवतीर्णा।

भौगोलिकवर्णनम्

भौगोलिकदृष्ट्या इयं हिमालयस्य 'गंगोत्तरी' इति स्थानाद् उद्गच्छति। गंगासागर-संगम-नाम्नि स्थाने गंगासागरे च समायाति। गंगोत्तरी गंगासागरसंगमश्च पवित्रौ तीर्थौ स्तः।

गंगातटस्थितानि नगराणि

गंगायाः तटे भूयांसि समृद्धानि नगराणि विद्यन्ते यथा हरिद्वारम्, प्रयागः, कर्णपूरम्, वाराणसी, पाटलिपुत्रम्, कालिकाता इति। हरिद्वारे पर्वताद् अवतीर्य इयं नदी समतलभूमिं प्रविशति। प्रयागे गंगा-यमुना-सरस्वतीनां संगमो वर्तते। भगवतः विश्वनाथस्य 'काशी' धाम गंगातटे एव वर्तते।

गंगायाः जलशुद्धिः

अधुना यत्र तत्र नगराणां दूषितजलेन गङ्गायाः जलमपि दूषितं भवति। भारत-सर्वकारेण गङ्गा-जल-शुद्धिम् अभिलक्ष्य प्रयत्नोऽपि कतिपयवर्षेभ्यः प्रारब्धः।

गंगाजलस्य उपयोगः हिन्दूभिः धार्मिककृत्येषु क्रियते। मृत्युशय्यायाम् अपि गङ्गाजलस्य उपयोगः क्रियते। किंबहुना—

> **नमामि गङ्गे तव पादपङ्कजं सुरासुरैर्वन्दितदिव्यरूपम्।**
> **मुक्तिञ्च मुक्तिञ्च ददासि नित्यं भावानुसारेण सदा नराणाम्॥**

39. यमुना

भारतस्य राजधानी यमुनातटे स्थिता वर्तते। यमुनायाः कालिन्दी, सूर्यसुता, यमभगिनीप्रभृतीनि नामानि सन्ति। प्रयागतीर्थे यमुना नदी गंगासरस्वतीभ्यां सम्मिल्य त्रिवेणी-रूपमाकलयति। तदनन्तरं आत्मानं पवित्रतमायां गङ्गायां विलीय स्वयमपि पवित्रतमा जायते।

यमुनायाः यात्रा

यमुना हिमालस्य 'यमुनोत्तरी' नामकात् स्थानात् निर्गच्छति। ततो निर्गत्य सा हिमाचलप्रदेशस्य हरियाणाप्रदेशस्य च भूभागान् सिञ्चन्ती दिल्लीनगरं प्राप्नोति। तदनन्तरं मथुरा-वृन्दावनयोः तीर्थयात्रिकेभ्यः जलनिमज्जनसुखम् उपजनयति। आगरानगरे जगतः सप्तमाश्चर्यभूतस्य 'ताजमहल' इत्याख्यस्य शोभां संवर्धमाना सा विन्ध्यप्रदेशं प्राप्नोति। तदनन्तरं सा चम्बल-सिन्धु-वेत्रवतीत्यादीनां नदीनां जलेन वर्धितपयःपूरा प्रयागम् आयाति।

यमुनायाः महत्त्वम्

यमुनायाः महत्त्वं निगमागमपुराणादिषु ग्रन्थेषु वर्णितमस्ति। पौराणिक्यः गाथाः विशेषतः श्रीमद्भागवतमहापुराणवर्णिताः, भगवतः श्रीकृष्णस्य बाल्यजीवनेन विशेषेण सम्बद्धाः दृश्यन्ते।

यमुनानद्याः लाभाः

भौगोलिक-दृष्ट्या नदीनाम् बहवः लाभाः सन्ति भारतभूम्यै। यमुनायाः अपि तिस्रः महाकुल्याः निस्सारिताः सन्ति। ताभिः हरियाणा-राज्यस्य उत्तरप्रदेशस्य च विस्तृतो भूभागः सिञ्च्यते। अमूल्यकाष्ठं यमुनायाः तटे जगाधरीनगरे नदीजलाद् बहिः निःसार्यते। अधुना विद्युदादिकोत्पादिकाः योजनाः अपि भारतसर्वकारेण विचार्यन्ते।

यमस्वसृरूपता

कदाचित् यमुना यमस्वसा इव आचरति। गतवर्षे यमुनामध्ये यः औघः उद्भुतः सः सर्वनाशस्य अग्रदूतः अतिष्ठत्। यमुना अकस्मादेव जलापूर्णा जाता। अद्यापि यमुनायाः जलाप्लावकृतं दुर्दृश्यं चिन्तयित्वा कस्य न वेपते हृदयम्?

40. भारतस्य राजधानी

अथवा

कापि महानगरी

[C.B.S.E. (O), 1992]

भारतस्य राष्ट्रीया राजधानी देहली इति ख्याता। अस्याः प्राचीनतम् नाम इन्द्रप्रस्थम् इति आसीत्। यथा शरीरस्य मध्यभागे हृदये आत्मा तिष्ठति तथैव भारतदेशस्य मध्यमो भागः स एव यत्र देहली इति नाम्ना ख्याता विशाला नगरी वर्तते। देहली इति नाम ढिल्लिका इति नाम्नः अपभ्रंशरूपः वर्तते। देहली-नगरे भारतस्य विविध-प्रदेश-वास्तव्याः जनाः सुगमतया द्रष्टुं शक्यन्ते। अत्र चाणक्यपुर्यां अन्येषामपि राष्ट्राणां राजदूतनिवासाः सन्ति।

केन्द्रीशासनस्य कार्यालयाः

देहलीमध्ये सर्वकारस्य केन्द्रीयशासनस्य अनेके कार्यालयाः तिष्ठन्ति। तत्र बहुभूमिकानि भवनानि सत्यमेव दर्शनीयानि। एतुषु भवनेषु लोकसभा-भवनम्, राज्यसभा-भवनम् राष्ट्रपतिनिवासश्च दर्शनीयानि सन्ति। भारतस्य प्रधानमंत्री अन्ये च केन्द्रीय-मन्त्रिणः अपि अस्मिन् नगरे वसन्ति। देहली प्रदेशस्य अधुना पृथक् विधानससभाऽपि निर्वाचिता वर्तते।

देहलीनगरस्य शोभा

देहलीनगरस्य शोभा एशियाड-82 समायोजनाद् अतीव वृद्धिं गता। विविधानि विशालक्रीडागंणानि नेहरू-नेशनल-स्टेडियंमादीनि अत्र निर्मितानि। उच्चैः पारगमनपथाः (फ्लाई-ओवर) अतीव रमणीयाः सन्ति। नूत्नदेहलीमध्ये मार्गाः विस्तृताः सुबद्धाः स्वच्छाश्च। रात्रौ तेषां मध्ये प्रकाशदण्डाः अतीव आनन्ददायिनः सुखप्रदाश्च. अत्र विविधानां यानानां सुमहान् सम्पातः वर्तते।

दर्शनीयस्थानानि

देहलीनगरस्थेषु दर्शनीयस्थानेषु सर्वोच्चन्यायालयः, अद्भूतालयः, जन्तुगृहम्, वायुयान-आस्थानम् वर्तन्ते। अद्भूतालये सङ्ग्रहालये वा जनानां प्रदर्शनार्थं विविधानां दर्शनीयवस्तूनां संग्रहः विद्यते। जन्तुगृहे च सिंह-गज-वानर-भल्लूकादयः वन्यजीवाः संगृहीताः तिष्ठन्ति।

देहलीनगरे देहलीविश्वविद्यालयः, जवाहरलालनेहरू-विश्वविद्यालयः, केन्द्रीयसंस्कृत-विद्यापीठश्च सन्ति। अत्र रक्तदुर्गः (लालकिला), बिरलामन्दिरम्, मिहिरपुरी (मेहरौली), लौह-स्तम्भश्च सर्वस्यापि जनस्य आकर्षणकारणनि सन्ति।

आकर्षणकेन्द्रम्

राजधानीति प्रसिद्धिकारणात् देहली सर्वस्यापि आकर्षणकेन्द्रम् अस्ति। अत्र दूरवीक्षणस्य अपि केन्द्रम् अस्ति ! अधुनां संसारे या प्रगतिः दृश्यते तस्याः यत्किञ्चिद् दिग्दर्शनं देहलीनगरे एव भवति।

41. महाकविः कालिदासः

सर्वश्रेष्ठः कविः

महाकविः कालिदासः संस्कृत-भाषायाः सर्वश्रेष्ठः कविः अस्ति। असौ नाटककारः, महाकाव्यनिर्माता गीतिकाव्यकर्ता च आसीत्। तस्य प्रमुखाः ग्रन्थाः सन्ति यथा (क) त्रीणि नाटकानि—मालविकाग्निमित्रम्, विक्रमोर्वशीयम् अभिज्ञानशाकुन्तलं च; (ख) महाकाव्यद्वयम्—कुमारसम्भवम्, रघुवंशम् च; (ग) गीतिकाव्यद्वयम्—ऋतुसंहारम्, मेघदूतं च। कालिदासः वैदर्भी-रीत्याः सर्वोत्तमः कविः आसीत्। तस्य नवनवोन्मेष-शालिनी प्रतिभा सर्वतोमुखी आसीत्।

विक्रमस्य सभाकविः

कालिदासः महाराजस्य विक्रमादित्यस्य सभाकविः आसीत्। तस्य राजधानी उज्जयिनी आसीत्। मेघदूते उज्जयिन्याः भव्यं वर्णनं विद्यते। विक्रमादित्यस्य सभायां कालिदासस्य नाटककानां प्रयोगः सञ्जातः। विक्रमोर्वशीयनाम्नि, कालिदासः विक्रमादित्यस्य कीर्तिं चिरस्थायिनीं चकार।

काव्य-सौष्ठवम्

कालिदासस्य कृतिषु प्रसाद-माधुर्य-गुणयोः अपूर्वं सम्मिश्रणं वर्तते। तत्र कृत्रिमतायाः क्लिष्टतायाश्च अभावोऽस्ति। तस्य काव्येषु उच्चकोट्याः व्यञ्जकता दृश्यते। रस-परिपाकोऽपि उत्तमरीत्या अभवत्। कालिदासः नीरसं कथानकमपि सरसं मनोरमं च करोति।

लोकप्रियतायाः कारणम्

कालिदासस्य लोकप्रियतायाः कारणं तस्य प्रसादगुणयुता ललिता परिष्कृता शैली अस्ति। शब्दलाघवः कालिदासस्य कलात्मकरुचेः परिचायकः अस्ति। अलंकारेषु उपमायाः प्रयोगः अद्वितीयः अस्ति। चरित्रचित्रणे कालिदासः अतीव पटुः अस्ति। भाषा भावश्च पात्रानुकूलौ तिष्ठतः। कालिदासस्य प्रकृतिचित्रणं अतीव रम्यम् अस्ति। कालिदास—मतेन तपसा प्रेम निर्मलं पुष्टं च भवति। कालिदासस्य उपमाप्रयोगे प्रसिद्धः अस्ति यथा उपमा कालिदासस्य।

42. स्मरणीया काऽपि घटना

अथवा

जलौघः

मया स्वजीवने काचिद् ईदृशी घटना अनुभूता या न कदापि विस्मर्तुं पार्यते। 1980 तमे ख्रीष्टाब्दे यमुनामध्ये यः जलौघः उद्भूतः सः सर्वनाशस्य अग्रदूतः अतिष्ठत्। यमुना अकस्मादेव जलापूर्णा जाता।

वृष्टि-बाहुल्यम्

वर्षाणां बाहुल्येन सर्वत्राऽपि स्थलं जलमयं जातम्। भवनानां छदयः जलस्पृष्टाः अभवन्। ततश्च जलं भित्तिषु अपि प्रविष्टम्। छदिभ्यो जलं स्रवति स्म। लोकाः गृहं त्यक्त्वा वहिरपि गन्तुं न शक्ताः। एकतः भवनानि भूमिसात् जायन्ते स्म; अपरतः मार्गाः जलापूर्णाः आसन्।

भयावहा स्थितिः

गृहान् परितः सर्वत्र जलमेव जलम् आसीत्। न अन्तः प्रवेशाय न च बहिर्गमनाय कोऽपि अलम् आसीत्। बहिर्गन्तुं नौकाः अपि न आसन्। भीताः जनाः अनाथाः असहायाः भूत्वा कालं नयन्ति स्म। न केवलं गृहाणि एव, अपितु ग्रामाश्चापि जलौघेन परिवृताः आसन्।

सहायताकार्याणि

अस्माभिः तु गृहस्य अनिवार्यः संभारः भवनस्य तृतीयायां भूमौ आनीतः। सैनिकाः जनानां सहायतां कुर्वन्ति स्म। ते लघ्वीषु नौकासु आरुह्य भोजन-पानवस्त्रादीनि वस्तूनि वितरन्ति स्म। जनैः उपकारिसंस्थाभिश्च पक्वा मण्डा आलुकानां स्यन्दितानाञ्च आपूर्णानि भाण्डानि च प्रेषितानि। राष्ट्रीय-स्वयंसेवक-संघस्य स्वयंसेवकाः अहोरात्रं साहाय्यं प्रदातुम् अग्रसराः अभवन्। जलाप्लावस्य अनन्तरं तैः लोकानां कृते भवनानि अपि निर्मितानि।

स्मरणीया घटना

यदा कदाचित् महती वृष्टिः जायते अहम् इमां घटनां स्मरामि। अद्यापि तत् दुर्दृश्यं चिन्तयित्वा मम् हृदयम् अतीव वेपते।

43. सत्संगतिः

प्रस्तावना

सज्जनानां सम्पर्कः सत्संगतिः भवति। अस्मिन् संसारे सज्जनाः अपि दुर्जनाः चापि भवन्ति। दुर्जस्य संगतिः दुस्संगतिः भवति। मनुष्यः संगतिं विना न तिष्ठति। या काऽपि संगतिः भवेत् इति अनिवार्यम्, परम् उभयोः संगत्योः महत् अन्तरम्। सत्संगतिः पोषिका, दुस्संगतिश्च नाशिका इति भेदः। कोऽपि विचारवान् नाशं न इच्छति, पोषं तु इच्छति, तेन सत्संगतिः एव वरतरा।

सत्संगत्या गुणस्पृहा

सज्जनपुरुषाः कैश्चिद्-गुणैः सज्जनाः भवन्ति नाऽन्यथा। तस्मात् सज्जनसंगत्या मनुष्ये गुणानां कृते स्पृहा वर्धते। ते गुणान् अभिनन्दन्ति। तेन च शनैः शनैः सत्संगत्या मनुष्ये गुणाः निविशन्ति दुर्गुणाश्च एकैकं बहिः गच्छन्ति। सद्गुणसम्पन्नो नरः

शरीरेण, मनसा, बुद्ध्या इन्द्रियैश्च स्वस्थतरो जायते। तेन च तस्य आयुष्यं वर्धते। तस्य यशः उत्तरोत्तरं वर्धते। सत्संगेन प्रपुष्टो जनः शनैः शनैः लोकनेता जायते। कथितं च—सत्सङ्गजा दोषगुणा भवन्ति।

संगस्य प्रभावः

संगस्य महान् प्रभावः। यदि कश्चिद् दुर्जनः सज्जनानां सहवासं करोति तत् स सज्जन एव मन्यते। परं यदि सज्जनः दुर्जनसंगे तिष्ठति तत् स दुर्जन एव मन्यते। इत्थं यशः उपचीयते वा अपचीयते वा। यदि कश्चन मद्यपः दुग्धस्य भाण्डं हस्ते धारयति तत् तद् दुग्धमपि मद्यं मन्यते लोकेन। यदि तु सज्जनोऽपि मद्यं हस्ते नयति तत् कोऽपि तत् मद्यं न विचारयति। अत्र च संगतिः एव कारणम्।

सत्संगतेः प्रभावः

सत्संगतिप्रभावेण बहु अन्तरम् आगच्छति। वाल्मीकिः मुनिः दस्युभावं त्यक्त्वा न केवल भारते, सम्पूर्णे अपि विश्वे इति ख्यातः। एकदा भगवान् नारदः ऋषिः ब्रह्मा च तेन निगृहीतौ, परं तयोः कल्याणमयं वाङ्मयं श्रुत्वा शनैः शनैः तस्य पुण्योदयो जातः। दैविकप्रसादेन स रामायणम् अरचयत्। अयं सत्संगस्य एव सुप्रभावः। अतः नरेण सत्संग एव करणीयः, दुस्संगश्च सर्वथा त्याज्यः।

44. सत्यं ब्रूयात्, प्रियं ब्रूयात्

प्रस्तावना, सत्यस्य स्वरूपम्

अयम् संसारः सत्ये प्रतिष्ठितः। यद् यथा तस्य चिन्तनं, कथनं, आचरणं च सत्यम् इति भवति। यत्तु इतो विपरीतं तत् असत्यम् भवति। सत्यं नरस्य सामान्या प्रवृत्तिः। असत्यं तु असामान्य निन्द्या च प्रवृत्तिः।

सत्यं सामान्या प्रवृतिः

सत्यं सामान्या प्रवृत्तिः इति। अस्य तु प्रमाणं बालाः, सत्त्वगुणप्रधाना मुग्धमुग्धा ग्रामीणाः, पर्वतीयाश्च जनाः। बालः यद् यथा चिन्तयति, पश्यति करोति च, तत् तत् तथैव पृष्टो वा अपृष्टो वा अन्यं कथयति। न तत्र असत्यं वदति। इत्थमेव सत्त्वप्रधानो ग्रामीणो जनः अपि आचरति।

अप्रियं सत्यं नोचितम्

केचन अन्येऽपि सत्यवादिनो नरा अत्र दृश्यन्ते ये सत्यं तु वदन्ति परं तत् सर्वथा अभद्रम् अमंगलं च कृत्वा वदन्ति। तेन च लोको विषीदति सर्वोऽपि च तस्य तस्य जनस्य शत्रुः इव जायते। अन्धं जनं कश्चित्, भो अन्ध ! इति एवं संबोधयति यदि तत् तेन सत्येन अपि स अन्धः दूयते। यदि तु, भोः 'प्रज्ञाचक्षु' इति संबोधयति तत् स आत्मानं आदृतं मन्यते।

सत्यं प्रियं कृत्वा वदेत्

समाजस्य जनेभ्यो दुर्गुणानां वारणाय सत्यभाषणस्य महती आवश्यकता। परं तत् सत्यं प्रियं कृत्वा वदेत् इति बहु आवश्यकम्। न ततो अन्या गतिः। बालस्य ज्वरौषधं कटु अपि सितासंवलितं दत्तं ज्वरवारकं रोचकञ्च तिष्ठति। केवलं कटुं औषधं कः सेविष्यते? इत्थमेव सत्यं वक्तव्यं परं प्रियं कृत्वा एव, नान्यथा इति।

45. ऋते ज्ञानान्न मुक्तिः

प्रस्तावना

"ऋते ज्ञानात् न मुक्तिः" अस्य अयं अर्थः यत् यावत् कालं ज्ञानं न सिध्यति तावत् कालं मुक्तिः अपि न सिध्यति। अत्र इदं ज्ञातव्यं भवति यत् ज्ञानं किं, कथं च तत् उपकरोति? मुक्तिः इति अस्य कः अर्थः किं च तया साध्यते?

ज्ञानं किं भवति?

ज्ञानम्, अयं शब्दः ज्ञा अवबोधने इति धातोः सिध्यति। इदं किं, तत् किं, इतीदृशाः प्रश्नाः मनस्विनं परितः तिष्ठन्ति। स च ज्ञानेन साधनेन सम्पन्नो भूत्वा निजबुद्ध्या यद् यत् चिन्तयति तत् तदेव परिचिनोति। जलं दृष्ट्वा इदं किं कथञ्च इत्येवं रूपा जिज्ञासा मनस्विनो जायते। अग्नि दृष्ट्वा इदं किं कथञ्च इत्येवं मनसि जायते। मेघं दृष्ट्वा अस्य केन प्रकारेण जन्म, पृथिवीं दृष्ट्वा इदं किंरूपं इदं भूतं, वायुं दृष्ट्वा कोऽयं वायुः इत्येवं रूपा विचारणा विदुषो जायते।

सत्यस्य प्रकटीकरणम् एव ज्ञानम्

इन्द्रियाणि किंरूपाणि, कर्म कीदृशं, आत्मा किंरूपः, परमात्मा अस्ति चेत् कीदृशः, इतीत्थं सर्वमं किंचिद् दृष्ट्वा-दृष्ट्वा बालस्येव उत्कटी जिज्ञासा मनसि जायते। तत ऊर्ध्वं समाहितैः विचारैः चिन्तनैः तत् तद् विषये ज्ञानं जायते तस्य तस्य विषयस्य सत्यता च पुरस्तात् प्रकटी-भवति।

ज्ञानात् मुक्तिः

ज्ञानेन सर्वं सत्यरूपं बुद्ध्वा पुनस्तस्य पाशात् मनस्वी मुच्यते। संसारस्य ग्राहरूपस्य सम्यग् ज्ञानेन मनुष्य ततो मुच्यते, तस्मिन् अनासक्तो जायते। कर्माणि निःसंगानि कुर्वन परम् तत्त्वं परमात्मानं सततं चिन्तयन् कर्मपाशात् मुच्यते। जन्ममरणबन्धनात् रक्षितश्च जायते। मुक्तिं प्राप्नोति। परम् इदं सर्वं ज्ञानाद् विना न सम्भवम्। अतः यथार्थम् एवमुच्यते—"ऋते ज्ञानान्न मुक्तिः" इति।

46. प्रजातन्त्रम्

प्रजातन्त्रस्य स्वरूपम्

अस्माकं भारतवर्षे शासनस्य या पद्धतिः साम्प्रतं दृश्यते सा प्रजातन्त्रीया शासनपद्धतिः इति सर्वत्र विश्रुता। प्रजायाः तन्त्रम्, प्रजाभ्यः तन्त्रम् इति। यत् तन्त्र 'प्रजा' इति उपादानकारणेन भवति, प्रजानां हिताय च भवति, तत् प्रजातन्त्रं भवति। प्रजाभिः स्वशासनाय कृतः यः विस्तरः लोकव्यवहारणां तदेव प्रजातन्त्रम् इति कथ्यते।

प्रजातन्त्रस्य लाभाः

अधिनायकवादप्रमुखे देशे एक एव सर्वप्रमुखः तस्यैव वचनम् आदेशाश्च प्रभवन्ति। परं प्रजातन्त्रात्मके देशे स्थानात् स्थानं प्रजाप्रतिनिधय एव निर्वाचनेन सम्मताः भूत्वा शासनस्य कार्यं निर्वाहयन्ति। देशस्य सर्वप्रमुखो राष्ट्रपतिरपि प्रजाभ्यो निर्वाचित एव पुरुषो भवति नान्यः, तेन शासनस्य निम्नतमात् स्तरात् आदाय ऊर्ध्वतम् स्तरं यावत् सर्वेऽपि निर्वाचने सफला एव जनाः कार्यस्य धुरं वहन्ति। यावन्मात्रं तेषु योग्यता क्षमता च भवति तावन्मात्रं प्रजातन्त्रीयशासनं प्रजानां हिताय कल्पते वा न वा।

प्रजातन्त्रस्य दुर्विकाराः

प्रजातन्त्रीयशासनं कूर्मस्येव मन्दसंचारं भवति। कार्याणि भवन्ति परं गतिः अतिमन्दा प्रायेण दृश्यते। अतिमन्दता च गत्याः मनोग्लानिं जनयति। केचन प्राभिशंसनैः उपदानेन वा कार्यं साधयन्ति। परं ये अभावग्रस्ता दरिद्राश्च तेषां कार्यसिद्धिः कदाचिदेव भवति।

दुर्विकाराणाम् दूरीकरणम्

यदि प्रजातन्त्रस्य शकटस्य नायकभूता जनाः स्वार्थान् उपेक्ष्य परमार्थदृष्ट्या अधिकाधिकं सेवाकार्यं कुर्युः, तत् प्रजातन्त्रं सर्वस्यापि आशुलाभाय महते लाभाय च कल्पेत। तेन च अस्य वरतमत्वं अपि प्रतिष्ठितं भवेत्।

47. नौका-विहारः

चण्डीगढ़े सुखना-सरोवरः

अहं ग्रीष्मावकाशेषु निजैः पुत्रैः पत्न्या च सह चण्डीगढं प्रयातः। चिरान् मनसि उत्कटः अभिलाषः आसीत् यत् सर्वैः सह नौकाविहारः कृतः स्यात्। तस्मात् वयं सर्वे सुखना (सुक्षणः सरोवरः) सरोवरं प्राप्ताः।

नौकाचालनम्

वयं शीघ्रमेव नौका-आस्थानं प्राप्ताः। ततः आस्थाननिर्देशकस्य आज्ञया पंचरूप्यकमितं धनं शुल्करूपेण दत्त्वा एक नौकाचालकं सहैव आदाय सुपुष्टायां नौकायां मन्दं मन्दं गत्वा स्थिताः। अस्मासु कोऽपि भयं न धारयति स्म। प्रत्युत महता उत्साहेन सर्वेऽपि नौकाचालनाय अरित्रग्रहणाय उन्मुखा अतिष्ठन्। एकस्मिन् अरित्रे कुशलो युवा चालकः, अन्यस्मिन् अहं, अन्ययोः द्वयोः उपरि च मम द्वो पुत्रौ स्थितौ। नौकाचालकस्य नेतृत्वे तस्य संकेतानुसारम् अस्माभिरपि चालनं आरब्धम्।

नौकायां मनोरञ्जनम्

मम पत्नी चित्रपटगायिकेव एकं सहगानम् आरब्धवती। वयमपि ताम् अनु अगायाम। तेन गानेन अस्माकं श्रमो विनष्टः, स्फूर्तिश्च गात्रेषु पदं न्यदधात्। वयं सर्वे वाग्भिः विविधाभिः मनोविनोदं कुर्मः स्म। इदानीं वयं तटभूमेः सामीप्यं प्राप्ताः। दशरूपप्यकाणि चालकाय दत्त्वा नगरं विवृत्ताः। इदानीम् अपि वयं बहुवारं नौकाविहारं स्मृत्वा-स्मृत्वा प्रसन्नाः भवामः।

48. बुद्धिर्यस्य बलं तस्य

प्रस्तावना-बलं

बलं अत्र द्विविधम्, शारीरिकं बौद्धिकञ्च। केचन शारीरिकं बलम् उत्कृष्टतरं मन्यन्ते अपरे च बौद्धिकं बलम्। परम् उपर्युक्तशीर्षकस्य अयम् अभिप्रायः यत् बौद्धिकं बलं उत्कृष्टतरम्।

सिंह-शशक-कथा

अस्मिन् प्रसंगे एका कथाऽतीव प्रसिद्धा। एकस्मिन् वने एकः सिंहः वसति स्म। स तत्रत्यान् वनजन्तून् प्रतिदिनं तुदति स्म। अनेकात् क्षतविक्षतान् कृत्वा मृत्युलोकं प्रापयति स्म। कांश्चित् च भक्षयति स्म। एकदा तैः प्रार्थितम्—भो वनराज! अस्माकं मध्ये प्रतिदिनं क्रमशः एकैकः जन्तुः भवत्पार्श्वे भोजनाय आयास्यति तेन भवान् तृप्तिं

करोतु। स तथास्तु इति स्वीकृतवान्। ततः प्रतिदिनं एकैको भोजनाय तस्य पार्श्वे गच्छति स्म।

एकदा एकस्य शशकस्य वारः समायातः। सिंहस्य मारणोपायं अचिन्तयत्। स तस्य पार्श्वे चिरात् प्राप्तः। बुभुक्षितः सिंहस्तं विलम्बस्य कारणम् अपृच्छत्। स आह-मार्गे अपरः सिंहः मां रोधयित्वाऽपृच्छत्—कुत्र यासीति। अहम् आह—स्वामिसमीपं गच्छामि। स आह—नान्यो मत्तः अपरः अत्र स्वामी। तेन तं दृष्ट्वा शीघ्रं मम पार्श्वे निवर्त्तस्व इति। तच्छ्रुत्वा कुपितः सिंहः तामादाय तद् दर्शितं कूपं प्राप्तः। तत्र जले निजछायां सिंह मत्वा तस्य वधाय स कूपे अवपपात्, मृतश्च। एवं शशकेन निजबुद्धिबलेन सिंहोऽपि व्यापादितः। तेन सत्यमेव उक्तम्—बुद्धिर्यस्य बलं तस्य इति।

बौद्धिकबलस्य महिमा

शारीरिकबलेन तु मनुष्यः कांश्चिदेव शत्रून् हन्ति परं बौद्धिकबलेन शरीरबलात् हीनोऽपि जन्तुः अनेकानि हन्ति। यदा दण्डैः परस्परं युद्धं भवति, खड्गैः मुष्टिभिर्वा, तदा बहुप्राणहानिः न भवति। परं बुद्धया येषां अस्त्रशस्त्राणाम् आविष्कारो भवति तैः संख्यातीतान् शत्रुन् एकोऽपि योद्धा क्षणे एव हन्ति इति को न जानाति। परमाणुबम, हाईड्रोजन बम, विषाक्तवायुः इति अनेकविधानि अस्त्राणि विज्ञानेन आविष्कृतानि सन्ति यैः हीरोशिमादिषु जापानस्थेषु प्रदेशेषु महान् जनसंहारः क्षणेनैव जातः।

49. जननी जन्मभूमिश्च स्वर्गादपि गरीयसी

प्रस्तावना

अस्याः सूक्तेः अयम् अर्थः यत् जननी-माता, जन्मभूमिश्च स्वर्गस्थानादपि गुरुतरा भवति। लोके इदं विश्रुतं वर्तते यत् स्वर्गलोके सर्वेषां दुःखानां निराकरणं जायते, सुखानाञ्च सर्वेषाम् उद्भवो जायते। दुःखस्थानं नरकं विहाय सर्वोऽपि सुखस्य परमोच्चं स्थानं स्वर्गं कामयते। परम् अत्र अन्यदेव प्रतिपादितम्।

जननी अपत्यरक्षणव्रत धारिणी

गर्भकाले नव दश मासेभ्यः निजे गर्भे संतानं धृत्वा प्राक् तत्रत्यं सततं पोषयति। स्वयं सर्वविधं कष्टं सहते, गर्भस्यञ्च सर्वथा रक्षति। ततः प्रसवादूर्ध्वं जननी निजम् अपत्यं दिवारात्रं एकमनसा रक्षति। तस्य दुःखानि अपोहति सुखानाञ्च संचारं करोति। स्वयं तदर्थं सर्वविधानि कष्टानि सहते। दिवाऽपि रात्रौ अपि सहिष्णुतया स्नेहेन अपूर्वेण तं पोषयति। तस्य दुःखे दुःखं, सुखे च आत्मनः सुखं मन्यते।

जन्मभूमिः उत्कृष्टतरा

जन्मभूमिरपि जननीव उत्कृष्टतरा। जन्मभूमिः लोकस्य शरणदायिनी, विविधखाद्यपदार्थप्रदायिनी, लीलाभूमिः सर्वव्यवहाराणां तिष्ठति।

विदेशेषु जन्मभूमिस्मरणम्

विदेशं गतो जनः सौख्यं लभमानोऽपि जन्मभूमिं पुनः पुनः स्मरति। तदेव उक्तं केनऽपि अन्योक्ति-रूपेण—

रसयन् गोस्तनीकन्दं स्थितोऽपि स्वर्णपंजरे।
स्वदेशस्य वियोगेन दह्यते एव कोकिलः॥

स्वर्गादपि गरीयसी

स्वर्गलोकस्य सुखम् अभूतपूर्वं कथ्यते। परं जननीवत् जन्मभूमिवच्च तस्मात् न

कस्यापि पोषः। तत्कथं स जननीं जन्मभूमिं च अतिरिच्य तिष्ठेत्. तेनैव हेतुना इदं विश्रुतं यत्—जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।

50. स्त्री-शिक्षा

प्रस्तावना

स्त्री पुरुषस्य अर्धांगिनी इतीदं वैदिकसंस्कृतौ प्रसिद्धम्। येन यथैव पुरुषाणां कृते शिक्षा अनिवार्या तथैव स्त्रीणां कृतेऽपि परमावश्यका एव। यथा एकेन चक्रेण रथस्य गतिर्न भवेत् तथैव केवलेन पुरुषेण मनुष्यसमाजस्य रथस्य गतिर्न सम्भवा। शिक्षितः पुरुषः अशिक्षिता मूढा च नारी इति युगलं न रुचिकरम्। सर्वथा वैरस्यं एव जायते। कदाचिदपि पुरुषशिक्षा इत्ययं शब्दो न श्रुतिपथं गतः परं स्त्रीशिक्षा इत्ययं शब्दस्तु सामान्य एव मनीषिणां च बुद्धेः आन्दोलकः प्रथितः।

वेदेषु स्त्री-शिक्षा

वेदेषु मन्त्रद्रष्टारो यथा पुरुषा आसन् तदैव काश्चन नार्योऽपि अभवन्। ब्रह्मवादिन्यः मैत्रेयीगार्गीसमाः अनेकाः स्त्रियो भारतेऽभवन्। मण्डनमिश्रस्य पत्नी स्वयं परमविदुषी आसीत्। कालिदासस्य पत्नी विद्योत्तमा पण्डिता इति प्रसिद्धमेव। अतो भारतस्य वैदिकपरम्पराम् अनुरुध्य स्त्रीशिक्षा पुरुषशिक्षेव अनिवार्या।

नारीपूजास्थानेषु देवतानां वासः

नारीशिक्षा नारीपूजैव। यत्र च नारीपूजा तत्र देवतानां वास इति इदं "यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः" इत्यनेन श्लोकखण्डेन सुतमां प्रतिपादितम्। शिक्षिता नारी शिक्षिता माता, भगिनी, पुत्री च, सा च स्वपरिवारस्य महते कल्याणाय यथा कल्पते न तथा अशिक्षिता नारी । सा हि शिक्षितपुरुषस्येव समाजस्यापि अलक्रिया।

नारीशिक्षया समाजोन्नतिः

शिक्षितया स्त्रिया समाजः स्वस्थः पुष्टः विकासोन्मुखश्च जायते। तस्मात् निजस्त्रीधनस्य रक्षापराः तिष्ठन्तो वयं तासां शिक्षाविषये अपि अप्रमत्ताः तिष्ठेम इत्येव साधुः।

51. सहशिक्षा

सहशिक्षायाः स्वरूपम्

सहशिक्षा इत्ययं शब्दः बालबालिकयोः सहैव एकस्मिन् विद्यालये शिक्षां बोधयति। अयं शब्दः अर्वाचीनः आंगलदेशीयप्रभावाच्च अस्य उद्भवः। यद्यपि प्राचीनभारतेऽपि आश्रमेषु तापसयुवानो युवत्यश्च सहैव उषन्त्यः शिक्षां गृह्णन्ति स्म परं तत्र धर्मस्य, नैतिकतायाः अनुशासनस्य च महान् अंकुशः आसीत्। सततं मनसा वाचा कर्मणा संस्काराणां प्रदानं भवति स्म। तेन च कामुकतायाः उपद्रवो न भवति स्म। अतः आधुनिकी सहशिक्षा प्राचीना च सहशिक्षा परस्परं महदन्तरं भजेते। तस्मिन् काले सा समस्या न आसीत्। साम्प्रतं तु सा गंभीरा समस्या भूत्वा पुरस्तात् तिष्ठति। अतएव विचारस्य अवसरः।

सहशिक्षायाः लाभाः

केचन सहशिक्षायाः समर्थकाः अस्माकं देशे। तदनुसारं सहशिक्षा आवश्यकी यतोहि सहवासेन बालः बालिकानां प्रवृत्तीः चेष्टाश्च बुध्यते। तद् बुद्ध्वा च स भविष्यजीवने

गृहस्थाश्रमे यथावत् चेष्टते। तदभावे स स्त्रीप्रकृतिम् अबुद्ध्वा कुशलो गृहस्थो न स्यात्। अथ च शिक्षा बहुधनम् अपेक्षते। भारतशासनम् आर्थिक सहायतां ददाति विद्याशालाभ्यः। पर कोशे तावद्धनं न भवति यत् बालानां बालिकानाञ्च कृते पृथक्-पृथक् विद्याशालाः प्रयोगशालाश्च स्थापिताः स्युः। तस्मात् एकस्यां विद्याशालायाम् उभयोरपि सहशिक्षा भवितुं शक्नोति अल्पेनाऽपि व्ययेन। इतरथा तु द्विगुणो व्ययो भवति। न च तावान् अर्थभारो भारतशासनेन सोढुं शक्यः। तेन सहशिक्षैव सर्वत्र चलतु इति तन्मतम्।

सहशिक्षायाः दोषाः

सहशिक्षायाः विरोधिनस्तु एवं प्रतिपादयन्ति—

सहशिक्षा नास्त्युचिता यदो हि तेन विविधाः बालाः कामवासनाग्रस्ताः अकाले एव जायन्ते। तेन च ब्रह्मचर्याभावः अनुशासनहीनता च वर्धते। तत् कुतः शिक्षा? योरोपदेशष्वपि यौनदोषाः अनेन कारणेन एव।

नोचिता सहशिक्षा

तस्मात् पृथक् व्यवस्थाया स्वास्थ्यरक्षा, सर्वकारस्य धनरक्षा च। चस्य धनस्य कश्चिदंशः पृथक् व्यवस्थाकृते कल्पेत एव। अतो नोचिता सहशिक्षा।

52. वाष्पयान-दुर्घटना

वाष्पयानस्य स्तब्धता

अहं गते मासे केनचित् प्रयोजनेन वाष्पयानेन देहलीं प्रति प्रस्थितः। यदा रेलयानं सोनीपततः किञ्चिद् दूरं यातः तदा अकस्मादेव महान् हाहाकारो जातः। यानस्य प्राक् गन्त्रं (इंजन) लोहमार्गम् अधः स्खलितम्। ततश्च अनुवर्तीनि दभ्राणि (डब्बे) एकैकशः लोहमार्गात् स्खलिताः।

गन्त्रं स्वत एव स्तब्धं जातम्। दभ्राणि चैवापि असहायानीव स्तब्धानि। सर्वे अत्यन्तं विस्मिताः किंकर्त्तव्यविमूढाश्च भयाक्रान्ताश्च अतिष्ठन्।

जनहानिः

अधस्तात् पतित्वा जनाः क्षतविक्षताः जाताः। कतिपये मृताः अपि। ये केचन अक्षताः ते परं भयाकुलाः जाताः। दभ्रेभ्यो निःसृत्य "कुत्राऽसौ मे बन्धुः, कुत्रासौ मे बन्धुः" इति सचीत्कारम् आक्रोशन्त। क्षतविक्षताः जनाः सहायतालाभाय अत्युत्सुकाः अतिष्ठन्।

चिकित्सा-प्रबन्धाः

एकहोरा-ऊर्ध्वं एकं चिकित्सायानं तत्र सम्प्राप्तम्। अनेके कुशलाः चिकित्सकाः जः सहायै, पट्टैः, औषधैः, रोगवाहनशिविकाभिश्च संवृताः तत्र उपागच्छन् सहायताकार्यं च समारभन्त। अनतिचिरं सर्वेऽपि क्षतविक्षताः प्राथमिकम् उपचारं लम्भिताः। कतिपये मृताः उत्तोल्य समीपस्थसोनीपतचिकित्सालयं प्रापिताः।

लोकानां सहयोगः

पार्श्ववर्तिग्रामेभ्यः अनेके बालाः पुरुषाः स्त्रियश्च दुर्घटनाक्षेत्रदर्शनाय उपस्थिताः तेषां बहवः समीपस्थान् निजान् ग्रामान् गत्वा जल-दुग्ध-चायदिकं सज्जं कृत्वा समानीय यात्रिभ्यः अयच्छन् तेषां कष्टञ्च अलघयन्।

53. लघूद्योग-प्रदर्शनी-पर्यवेक्षणम्

गतेषु एव दिवसेषु अहं लघुद्योगप्रदर्शनीपर्यवेक्षणार्थं राजधानीं देहलीं गतः आसम्।तत्र प्रातः नववादनात् आरभ्य रात्रौ दशवादनं यावत् विस्तीर्णायां प्रदर्शनीभूमौ विविधेषु कक्षेषु आयोजिता लघूद्योगप्रदर्शनीं सुचिरम् अपश्यम्।

प्रदर्शन्याः प्रयोजनम्

अस्याः प्रदर्शन्याः इदं प्रयोजनं आसीत् यत् प्रदेशे प्रदेशे येऽपि लघुद्योगाः प्रचलिताः सन्ति तेषां प्रदर्शनेन जनमानसेषु लघुद्योगेभ्यः रुचिः जनिता भवेत्

प्रदर्शन्याः विभागाः

तत्र प्रदर्शन्यां पञ्चदश प्रमुखाः कक्षाः आसन् तान् च अन्तरान्तरा अनेके लघुलघुकक्षाः अतिष्ठन्। एते प्रमुखाः कक्षाः भारतीयप्रदेशानां प्रतिनिधयः कक्षाः आसन्।

हरयानाकक्षः

अस्मिन् कक्षे हरयानामध्ये उद्गतानाम् उद्योगानां प्रदर्शनम् आसीत्। एकस्मिन् कक्षे शोधकस्य विविधताः प्रदर्शिताः। अन्यत्र कर्गलनिर्माणस्य प्रदर्शनम् आसीत्। सिता-बुरा-आदिकस्य अपि विविधताः प्रदर्शिताः अभवन्। चर्मकार्य विविधाः उपानहश्च आकर्षका आसन्।

उत्तरप्रदेशकक्षः

अत्र उत्तरप्रदेशीयलघूद्योगानां प्रदर्शनम् अभवत्। मृत्तिकाभ्यः कुम्भकारैः निर्मितानि मृद्भाण्डानि हृदयावर्जकानि अतिष्ठन्। खड्डी-उद्योगस्यापि तन्निर्मितदरीआदीनाञ्च विस्तरेण प्रदर्शनानि अतिष्ठन्। मोमवर्त्तिका-उद्योगः नितराम् आकर्षकः आसीत्। काष्ठासननिर्माणस्य उद्योगः लोकस्य परमोत्साहकोऽभवत्।

हिमाचलकक्षः

अस्मिन् कक्षे और्णयवस्त्रनिर्माणोद्योगः, फलरक्षणोद्योगश्च प्रख्यातः अतिष्ठत्।

इत्थमेव विभिन्नान् प्रदेशकक्षान् दृष्ट्वा लघुद्योगान् साक्षात्कृत्य अनेकविधं ज्ञानं लब्ध्वा प्रेरणामादाय वयं ततो रात्रौ दश-नादे निवृत्ताः।

54. सदाचारः

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥

प्रस्तावना

श्रेष्ठजनानाम् आचरणमेव सदाचारः कथ्यते। सतां (सज्जनानाम्) आचारः (आचरणम्) एव सदाचारः भवति। सत्पुरुषाः यथा प्रशस्तं कार्य कुर्वते, इतरे जनाः तदेव अनुसरन्ति। महाजनो येन गतः, सः पन्थाः इति सत्यम् अभिहितम्।

आचारः परमोधर्मः

जीवने सदाचारस्य अतीव महिमा वर्तते। 'आचारः परमो धर्मः' इति शास्त्रज्ञानां मतम्। शीलम् एव जीवस्य परमं भूषणम् अस्ति।

सदाचारस्य महिमा

सदाचारेण जनः शिष्टः, सभ्यः, विनीतः, विनम्रश्च भवति। असौ एव नरः परदारेषु मातृवद् आचरति परद्रव्ये च लोष्ठवद् व्यवहरति। सः कामक्रोधादीन् विकारान् निगृह्य

संयतः इव कर्मसु प्रवर्तते। मर्यादापुरुषोत्तमः भगवान् श्रीरामचन्द्रः सदाचारस्य आदर्शः पुरुषः आसीत्। इति सद्व्यवहारस्य एव परिणामः आसीत्।

सदाचारी पुरुषः लक्षणहीनोऽपि शतं वर्षाणि जीवति यथा—

सर्वलक्षणहीनोऽपि यः सदाचारवान् नरः।
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति॥

सदाचारविरहितस्य पतनम्

किन्तु यो नरः आचारहीनः अस्ति स तु पतितो भवति। धनाभावेन जनः पतितो न भवति यथा साधूक्तम्—

वृत्तं यत्नेन संरक्षेत् वित्तमेति च याति च।
अक्षीणो वित्तः क्षीणो वृत्ततस्तु हतो हतः॥

55. प्रातःकालवर्णनम्

मनोहारिणी वेला

रात्रिः गच्छति, अन्धकारः प्रणश्यति सुप्रभात प्रभाति । इयं ब्रह्मणः वेला। अस्मिन् ब्रह्ममुहूर्ते जनाः ईश्वरं ध्यायन्ति, पक्षिणश्च कलरवमाध्यमेन ब्रह्मणः गीतानि गायन्ति। नित्यम् आगच्छति स्वनियतकाले इयं मनोहारिणी वेला।

प्रातःकालस्य कर्माणि

भूतानि जाग्रति, निद्रां परित्यजन्ति, आलस्यं परिहरन्ति कर्मणि च प्रवर्तन्ते। चन्द्रमाः अस्ताचलं गच्छति, तारकाः निस्तेजाः जायन्ते, निशादेव्याः प्रस्थानकाले अतिदूरं गच्छति अन्धकारोऽपि। यदा उषः समायाति, प्राच्यां दिशि लालिमा प्रस्फुटति। शनैः-शनैः सूर्योदयो भवति। जनाः उदितं सूर्यं प्रमणन्ति।

प्रातरुत्थाय सर्वप्रथमं करदर्शनं करणीयम्। कराभ्यामेव कर्मसु प्रवृतिः भवति कथितं च—

कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती।
करमूले तु गोविन्दः प्रभाते करदर्शनम्॥

प्रातः स्मरणीयान् निज-निज-पूर्वजान् स्मरन्तः जना यदा तेषां गुणानां स्मरणं कुर्वन्ति तदा तेषां मनसि सङ्कल्पः उदेति यत् तेषां जीवनमपि तत्तद्गुणैर्युक्त भवेत्।

प्रातःकाले छात्राः वेदाध्ययनं कुर्वन्ति स्वपाठान् कण्ठस्थीकुर्वन्ति। अस्मिन्नवसरे मनः एकाग्रं जायते।

प्राकृतिकसौन्दर्यम्

उषसि मनोमुग्धकारी छटा वर्तते सरोवरेषु कमलानि विकसन्ति पुष्पेषु द्विरेफाः गुञ्जारं कुर्वन्ति मधुकरीभिः सह मधुरसं च पीत्वा मुग्धाः प्रमत्ताश्च इतस्ततः परिभ्रमन्ति। धेनवः स्ववत्सान् आह्वयन्ति। कृषकाः हलान् बलीवर्दान् च गृहीत्वा क्षेत्राणि प्रतिगच्छन्ति। कपयः वृक्षेषु कूर्दन्ति। एतद् दृश्यम् अवलोक्य कवीनां चेतः अपि नवोद्भावनां करोति।

56. बालोत्सववर्णनम्

बालोत्सवस्य निमित्तम्

प्रतिवर्षं नवम्बरमास्य चतुर्दश्यां तारिकायां बालदिवसः सम्पूर्णे भारतदेशे सोत्साहम्

उत्सवरूपेण मान्यते। एतस्यां तिथौ स्वतन्त्रभारतस्य प्रथमप्रधानमन्त्रिणः श्रीजवाहरलालनेहरोः जन्मदिवसः वर्तते। श्रीनेहरूमहाभागः शिशुषु बालेषु च भृशं स्नेहं करोति स्म। स्वतंत्र भारतराष्ट्रस्य पुनर्निर्माणार्थं यत्र अन्येषु क्षेत्रेषु अपि विविधाः योजनाः निर्मिताः तत्र बालकानां शिशूनां विकासाय अपि अनेकाः कार्यक्रमाः विरचिताः।

नेहरूचरितविषयकाः कार्यक्रमाः

बालदिवसे विद्यालयेषु छात्राः नेहरूमहाभागस्य जीवनचरितम् आदाय अनेकान् कार्यक्रमान् आयोजयन्ति। तस्य जीवनस्य विविधपक्षान् स्मृतिगतान् कृत्वा चित्रप्रतियोगिताः आयोज्यन्ते। आलेख्यरचनासु बालकानां सहजप्रवृतिः वर्तते। नानाविधानां गीत-कविता-नाटकादिभिः सर्वेषां मनोरंजनं क्रियते। बालकानां भाषण-प्रतियोगिताः वाद-विवाद-प्रतियोगिताः अपि आयोज्यन्ते।

'चाचा नेहरूः चिर जीवेत्' इति उद्घोषेण गगनं भिद्यते।

छात्र-सम्मेलनानि

दिल्लीनगरस्य विविधविद्यालयानां छात्राणां सम्मेलनानि जायन्ते। एतेषु उत्सवेषु बालकाः स्वजीवने नेहरूमहोदयस्य आदर्शान् ग्रहीतुं शपन्ति। विद्यालयेषु बालैः खाद्य-भोज्य-लेह्य-चौष्यादिसर्वविध-सुस्वादुपदार्थानां विविधाः आपणाः अपि आयोज्यन्ते। एतेषां विक्रयेण यः आर्थिकलाभो भवति स दरिद्रछात्राणा उपयुज्यते।

दिल्लीमहानगरस्य नेशनलस्टेडियमक्षेत्रे बालदिवसावसरे लक्षाधिसंख्यकाः जनाः एकत्रिताः भवन्ति। तत्र विविधविद्यालयानां छात्राः क्रीडानां सांस्कृतिकार्यक्रमाणा चाद्भुतं प्रदर्शन कुर्वन्ति। अत्र अध्यक्षमहोदयः मुख्यकार्यकारीपार्षदः शिक्षामन्त्रिमहोदयः च समागत्य बालोत्साहं वर्धयन्ति।

विद्याभारत्या आयोजनम्

आपातस्थित्युपरान्तं विद्याभारतीपक्षतः भारतस्य विविधेभ्यः नगरेभ्यः समागतानां शिशूनाम् एकम् अपूर्वं त्रिदिवसकालिकम् शिविरम् आयोजितम् आसीत्। तदायोजनं दृष्ट्वा दर्शकानां भारतस्य भविष्यं प्रति आस्था दृढीभूता। तत्र सामूहिक-कार्यक्रमाणाम् अद्भुतछटाम् अवलोक्य जनाः चकिताः आसन्। एतादृशाः कार्यक्रमाः तया संस्थया तदुपरान्तमपि भारतस्य अन्येषु नगरेषु संयोजिताः। बालकानां विकासः राष्ट्रविकासस्य मुख्यः आधारो वर्तते।

57. दूरदर्शनयन्त्रम्

विज्ञानस्य चमत्कारान् को न विजानाति? अस्माकं शताब्दी विज्ञानयुगः एव वर्तते। विविधेषु आविष्कारेषु अधुना प्रतिगृहं प्रचलितं दूरदर्शनयन्त्रम् अस्ति।

दूरदर्शनस्य स्वरूपम्

दूरदर्शनमाध्यमेन दविष्ठाः पदार्थाः निजगृहस्थिताः इव तृष्टाः जायन्ते। वयं निजगृहेषु विद्यमानाः एवं दूरवर्तिनः पदार्थन्, दूरघटितान् कार्यक्रमान्, दूरस्थितान् जनान् वा द्रष्टुं पारयामः।

दूरदर्शनस्य मूलसिद्धान्तः

अस्य यन्त्रस्य मूलसिद्धान्तः अयम् अस्ति यत् ऊर्जायाः एकस्मात् रूपात् अन्यस्मिन् रूपे परिवर्तनं भवति। दूरदर्शनकेन्द्रे प्रकाशतरंगाः ध्वनितरंगाश्च विद्युत्तरङ्गेषु परिवर्तिताः जायन्ते। एताः परिवर्तिताः विद्युत्तरङ्गाः वातावरणे गत्वा विविधेषु स्थानेषु

परिभ्रमन्ति। तत्पश्चात् दूरदर्शनयन्त्रम् तान् तरङ्गान् पुनः प्रकाश-तंरगेषु ध्वनितरंगेषु च परिवर्तितान् कृत्वा अस्माकं समक्षं दृश्यम् उपस्थापयितुं शक्नोति।

दूरदर्शनस्य कार्यक्रमाः

दूरदर्शने प्रतिदिनं नित्यनूतनसमाचारः दर्श्यन्ते श्राव्यन्ते च। तदतिरिक्तं विविधाः मनोरंजकाः सांस्कृतिकाः कार्यक्रमाः प्रस्तूयन्ते यथा चित्रहारः, चलचित्रम्, योगाभ्यासः शास्त्रीयसंगीतम्, सुगमसंगीतम्, पाश्चात्यसंगीतम्, नाटकानि, कृषिदर्शनम्, बालसभाः, लघुकथाः, नृत्यानि, प्रश्नोत्तराणि इति। विविनधकक्षानां पाठानाम् अपि दूरदर्शनेन पाठयितुम् आयोजनं क्रियते।

दूरदर्शने क्रीडा-प्रदर्शनम्

दूरदर्शने क्रीडाप्रतियोगिता-प्रदर्शनम् अतीव लोकप्रियं अस्ति। क्रीडकानां क्रिकेट-हॉकी-फुटबाल-क्रीडाः इत्थम् विलसन्ति यथा दर्शकाः एताः स्वसमक्षं वास्तविकरूपेण क्षेत्रेषु क्रीड्यमानाः पश्यन्ति।

58. पुस्तकालयः

स्वाध्यायस्य महत्त्वम्

स्वाध्यायात् न प्रमदितव्यम्। स्वाध्यायी जनः आत्मशुद्धेः मार्गम् अनुसरति। ज्ञानार्जनस्य बहवः उपायाः सन्ति। तेषु उपायेषु पुस्तकालयः सर्वोत्तमः यतः स्वरुच्यनुसारं तस्मात् स्थानात् पुस्तकानि प्राप्यन्ते।

पुस्तकालयानां स्वरूपम्

पुस्तकानाम् आलयः इति पुस्तकालयः, ग्रन्थानाम् आलयः इति ग्रन्थालयः इत्यादयः शब्दाः तत्स्थानं बोधयन्ति यत्र सर्वविषयकानि पुस्तकानि पत्रिकाः समाचारपत्राणि च निधीयन्ते संगृह्यन्ते। नराः च स्वरुच्यनुसारं पुस्तकानि गृहीत्वा प्रत्यावर्तयन्ति, तानि एव पुस्तकानि अन्य अपि जनाः पठन्ति ज्ञानवृद्धिं च कुर्वन्ति।

पुस्तकालयानां लाभाः

पुस्तकालयानां नैकाः लाभाः सन्ति। महज्जनानां कृतीनां माध्यमेन वयं तेषां महापुरुषाणां सत्कारमेव कुर्वन्ति। दिवंगताः अपि ते लोकहितकर्तारः निजादर्शरचनाभिः अहोरात्रं प्रेरयन्ति। सहस्रवर्षपूर्वजातानां पुरुषाणाम् अपि परिचयः तेषां पुस्तकानां माध्यमेन सरलतया प्राप्तुं शक्यते।

इच्छा-पूर्तिः

पुस्तकानां माध्यमेन जनः सर्वविदां समृद्धिं कर्तुं पारयति। यदि जनः निजव्यवसाये वृद्धिं कर्तुमिच्छति तदा तादृग्विषयप्रबोधिनीं पुस्तिकां पठित्वा निजाभिलाषं पूरयति। भिन्नरुचिर्हि लोकः। यदा जनः मनोरञ्जनम् इच्छति तदा तादृशं पुस्तकं पुस्तकालयात् लब्धुं शक्यते।

शोधकार्ये सहयोगः

शोधकार्याय, उच्चस्तरीयाध्ययनाय च छात्राः साधनाभावेन बहुमूल्यपुस्तकानि क्रेतुं न समर्थः। तेभ्यः छात्रेभ्यः सन्दर्भपुस्तकानि प्रदाय पुस्तकालयाः तेषां महदुपकारं कुर्वन्ति।

यदि वयं समयस्य सुदपयोगं वाञ्छामः तदा स्वातिरिक्तकाल पुस्तकालयेषु एव यापयेम तेन जीवने महती उन्नतिः भविष्यति।

59. होलिकोत्सवः

प्रस्तावना

अयम् उत्सवः प्रतिवर्षं फाल्गुणमासस्य पूर्णिमायां भवति। भारतराष्ट्रे प्रतिप्रदेशम् अयम् उत्सवः हास-परिहास-कार्यक्रमरूपतया मान्यते। अस्मिन् दिने रङ्गक्षेपण-गुलाल-प्रक्षेपणादिभिः आबालवृद्धाः परस्परं मनोरञ्जयन्ति। सन्ध्याकाले हास्यात्मक-साहित्य-कार्याक्रमाणां आयोजनं भवति। कुत्रचित् गानस्य वादनस्य च व्यवस्था क्रियते।

बालकाः बालिकाः सप्ताहपूर्वमेव रङ्गक्रीडाम् आरभन्ते। होलिकायाः पूजनपूर्वकम् अग्निसात्करणम् पूर्वरात्रौ भवति। अग्निं परितः जनाः नार्यः च सम्मिलन्ति, परिक्रमन्ते, नानागानादिकं च कुर्वन्ति।

मनोरञ्जकत्वम्

जनाः स्वमित्राणां बन्धूनां गृहं यान्ति। तत्र मिष्टान्नादिकस्य आदान-प्रदानं भवति। नानावर्णगुलालं मुखोपरि प्रक्षिपन्ति।

मदोन्मत्तानां क्रीडाः

आपणेषु रथ्यासु च सर्वत्र मदोन्मत्ताः जनाः कूर्दन्ति, उच्छलन्ति च मध्याह्नकालपर्यन्तं सर्वत्र ईदृशी क्रीडा प्रवर्तते। तदुपरान्तं जनाः स्नानं कुर्वन्ति। रात्रौ यत्र कुत्रापि कविसम्मेलनानि आयोज्यन्ते।

होलिका-दहन-कथा

होलिकोत्सवस्य सम्बन्धे एका किम्वदन्ती प्रचलिता वर्तते। हिरण्यकशिपोः नास्तिकस्य असुरराजस्य गृहे तस्य भगिनी होलिका नाम्ना आसीत्। तस्यै वरदानमासीत् यत्नाऽग्नौ न धक्ष्यति। हिरण्यकशिपोः पुत्रः प्रह्लादः ईश्वरभक्तः आसीत्। होलिका प्रह्लादम् अङ्के निधाय अग्नौ प्राविशत् येन प्रह्लादः भस्मसात् भवेत्। परं भगवत्कृपया प्रह्लादो भस्मसात् नाभवत्। होलिका अग्नौ दग्धा। तत्स्मृतौ अस्मिन् पर्वणि होलिका दहनम् आयोज्यते।

60. संघे शक्तिः कलौ युगे

अद्यत्वे संसारे यस्मिन् राष्ट्रे ऐक्यम् अस्ति,स प्रभुतासम्पन्नः अस्ति। विश्वगुरुः भारतदेशः ऐक्याभावात् परतन्त्रतापाशबद्धो जातः। परं यदा एकतायाः सूत्रमलभत तदा भारतीयाः स्वाधीनतामपि अलभन्त। अतः एवोच्यते—संघे शक्तिः कलौ युगे।

शक्त्या मूलकेन्द्रम् सङ्घः

बहुधा मन्यते यत् शक्तिः सैन्ये भवति, केचन शस्त्रास्त्रेषु शक्तिं मन्यन्ते। एतत्सत्यमस्ति। परं संघे यादृशी शक्तिरस्ति न तादृशी शक्तिः अन्यत्र वर्तते।

ऋग्वेदस्य उदाहरणम्

ऋग्वेदस्य अन्तिमसूक्ते एकतायाः महत्त्वं प्रतिपादितम् अस्ति। यथा

सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ॥1॥
समानो मन्त्रः समिति, समानी समानं मनः सह चित्तमेषाम्।
समानं मन्त्रमभिमन्त्रये वः। समानमेनं वो हविषा जुहोमि॥2॥

समानी व आकूतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुसहासति।।

संघनिर्माणस्य विधिः

संघस्य निर्माणे त्यागभावनायाः अनुशासनस्य च अतीव महत्त्वम् अस्ति। नतृवर्गे, लक्ष्ये च दृढ़ा निष्ठा संघ-निर्माणं पुष्णाति। वैयक्तिक-सुखं परित्यज्य अपि समष्टिहितस्य चिन्ता संघस्य घटकानां कृते अतीव अर्पक्षते। सुख-शान्ति-समृद्धिलाभाय एकता करणीया, धरणीया च। भिन्नः जनाः न सुखं प्राप्नुवन्ति, न धर्मं चरन्ति, न च गौरव लभन्ते। अतः 'संघेः शक्तिः कलौ युगे' इति सर्वथा सत्यमुक्त केनचित् कविना।

अभ्यास

एषु कमपि एक विषयमवलम्ब्य संस्कृतभाषाया पञ्चविंशत्यधिक शतशब्द-मितः प्रबन्धः विरच्यताम्—

इनमें से किसी एक विषय पर संस्कृत में 125 शब्दों का निबन्ध लिखिए—

Write an essay in Sanskrit in 125 words on any one of the following :

1. (*i*) विद्यालयस्य वार्षिकोत्सवः (*ii*) विज्ञानस्य चमत्काराः
   (*iii*) यद्यहं भारत-प्रधानमन्त्री स्याम् (*iv*) क्रीडा-प्रतियोगिता
   (*v*) प्रियः कवि।
2. (*i*) सत्संगति (*ii*) ऋते ज्ञानान्न मुक्तिः
   (*iii*) मम महत्त्वाकांक्षा (*iv*) मम प्रियः संस्कृतकविः
   (*v*) दीपमाला।
3. (*i*) वसन्तोत्सवः (*ii*) संस्कृतिः संस्कृताश्रिता
   (*iii*) कुम्भपर्वः (*iv*) पर्वतयात्रा
   (*v*) प्रियः नेता।
4. (*i*) श्रीजवाहरलालनेहरूः (*ii*) भारतीया संस्कृति
   (*iii*) श्रीमद्भगवद्गीता (*iv*) विद्यालयस्य वार्षिकोत्सवः।
5. (*i*) विद्यालयस्य सांस्कृतिककार्यकलापः (*ii*) विज्ञानं ब्रह्म विजानीयात्
   (*iii*) कालिदास्य आत्मकथा (*iv*) वसन्तवर्णनम्
   (*v*) काऽपि यात्रा।
6. (*i*) कालिदासः (*ii*) संस्कृत-भाषायाः गौरवम्
   (*iii*) मम प्रियं पुस्तकम् (*iv*) परोपकारः।
7. (*i*) वाद-विवाद-प्रतियोगिता (*ii*) सत्यं ब्रूयात् प्रियं ब्रूयात्
   (*iii*) मुद्रिकायाः आत्मकथा (*iv*) ग्रीष्मवर्णनम्
   (*v*) स्वप्नवर्णनम्।
8. (*i*) काऽपि रेलयात्रा (*ii*) पर्यटनम्
   (*iii*) स्वतन्त्रता-दिवसोत्सवः।

9. (*i*) अस्माकं विद्यालयः (*ii*) अनुशासनं
(*iii*) वर्षा-ऋतुः (*iv*) प्रियः शिक्षकः
(*v*) गृहोद्यानम्।

10. (*i*) उद्योगप्रदर्शनी (*ii*) जन्तुशाला-भ्रमणम्
(*iii*) अस्माकम् देशः।

11. (*i*) बालोत्सववर्णनम् (*ii*) दूरदर्शनयन्त्रम्
(*iii*) विद्यालयः।

12. (*i*) मम प्रियः राष्ट्रनेता (*ii*) कोऽपि महाकविः
(*iii*) भारतवर्षम् (*iv*) ग्रीष्मर्तुः
(*v*) कापि क्रीडा।

13. (*i*) होलिकोत्सवः ; (*ii*) प्रियः नेता ;
(*iii*) सदाचारः ; (*iv*) क्रीडा-प्रतिस्पर्धा ;
(*v*) विद्या ददाति विनयम्।

□